M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 821

Title: Advaitamrtasandhan
Tika

821

अद्वैतानुसंधान टीका

Title	Advaitanusamdhan Tikā
Author	Jagannāthānand Muni
Editor	
Year. Vols.	Saka 1717
Publisher	
Remarks	

821

श्रे.दे.टी. ॥ श्रीगणेशायनमः ॥ ॥ संयोगश्च निरवयवेन तस्मिन्नसंभवतीत्युक्तं ॥ किंच चक्षु
रसिद्धकारित्वे आलोकादिवैयर्थ्यं मनसः पृथक् प्रमाकरणत्वानुपपत्तेश्चा तदिंद्रियाणामेवोपादा
६९ नेमनसोपनिषदानां प्रमाणमिति चेन्न ... मैः संकल्पइत्यादिश्रुतिहृदारण्यकश्रु
तिरित्याह ॥ कूटस्थात्मनो ज्ञानपरिणामासंभवेन तत्परिणामिमनःकल्पनाच्च मनःकरणकं
दृष्ट्यादिविषयकज्ञानकल्पने दोषांतरमाह ॥ अनुव्यवसायस्येति मनोजन्यज्ञानविषयकज्ञा
नकल्पने दोषांतरं मनुव्यवसायं तस्य कल्पनापातः गौरवात् गुरुत्वादित्यर्थः गौरवे हेतुमाह ज्ञाने
ति वृत्यादि दृष्ट्यादितद्विषयकानुव्यवसायतदाश्रयाणां त्रयाणां श्रुतिविषयत्वकल्पनाप्रसंगेने
त्यर्थः अथवा वक्ष्यमाणरीत्यासकलांतःकरणधर्मसाक्षिकल्पनातोनंतानुव्यवसायकल्प ६९
नागुर्वीत्यर्थः चकारेणाद्व्वैकानुव्यवसायस्याप्यभावं समुच्चयति श्रुत्युक्तद्रष्टृरूपायाद्रष्टे
रात्माभेदयोग्यतां कथयितुमेकत्वं साधयति ॥ अतएवेति श्रेणीकत्वे हेतुं समुच्चयति अतः पत्र २

शब्दार्थमादृत्य बुद्धीति बुद्ध्यादिव्यवहारः स्वविषयविषयकज्ञानसाध्यः व्यवहारत्वात् घटादि
व्यवहारवदिति सिद्धे बुद्ध्यादिविषयकज्ञानेन त्वयापदेकमेव सिध्यतीत्यर्थः ननु असति
बाधके ज्ञानं व्यवहारने अस्ति चात्र बाधकं सुखज्ञानमुत्पन्नं दुःखज्ञानं नष्टमिति प्रतीतिरि
त्याशंक्याह सुखादीत्यादिना सुखाद्यनुभवोत्पादविनाशबुद्ध्योः कथं सुखादिविषयत्वं न
हि घटविषयकज्ञानं पटविषयकं भवतीत्याशंक्याह देवं यदि सुखे विद्यमा
ने सुखादिज्ञानार्थं कश्चिद्यतेत यथा घटे विद्यमाने तज्ज्ञानार्थं पुरुषो यतते न च तथेहदृश्य
ते परैः स्वीक्रियते वा तथा च यथा घटे उत्पन्ने घटाकारोत्पन्नं तेन नष्टे च तस्मिन् घटाका
रोत्पन्नस्तद्विषयकत्वं नादृश्यते तद्विषयकत्वेन सुखाद्युत्पादविनाशबुद्ध्योर
पि सुखादिविषयत्वमित्याभिसंधायाह सुखाद्युत्पादकेति तदुत्पादकसुखादिज्ञानो
त्पादकविपत्तेर्वाधकमाह ॥ अन्यथेति ॥ प्रतीयमानं घटाकारज्ञानोत्पत्तिं विना प्रतीतो
गात्र

अद्वै.टी
८०

रपि अध्यक्षानुविषयत्वस्यादित्यर्थः उक्तज्ञानस्य नैकत्वकल्पने बाधकांतरमाह अनु
भवैकाकारबुद्धेरिति अस्यार्थः अनुभवविषयत्वे सुखादिनासंबंधः तद्विपरीतं प्रामाणि
कत्वात्तद्विपरीतं गौरवं विघूर्णोति अनंतेति सुखादिज्ञानस्यैकत्वमनभ्युपगच्छतां हि
तेषामनंतत्वं तेषु चानुभवत्वमेका जातिः कल्पनीया अनुगतबुद्धेरनेकव्यक्तिविष
यत्वे जातिविषयत्वनियमात् इत्यर्थः तदनुपपत्तेः सुखादिज्ञानस्यानेकत्वानुपपत्तेरि
त्यर्थः न केवलमेकविषयत्वे [illegible] कल्पमपीत्याह तस्य [illegible] परमा[illegible]नः
स्वरूपं [illegible] सर्वं जगत् [illegible] इत्यर्थः अनुगतबुद्धेरेक ८०
विषयत्वे दृष्टांतं दर्शयति स हैवेति इत्यादि [illegible] घटादिषु सर्वदित
नुगतबुद्धिविषयः तथा सुखाद्यनुभवेष्वनुभवोनुभव इत्येकाकारा बुद्धिरेकमेवानु
भवं विषयीकरोति इत्यर्थः अंतःकरणधर्मातिरिक्तस्यैकस्य [illegible] कस्मान्नाभ्युपेयते

पत्र
२

अ
गतावैनित्यत्वं कस्मान्नसाधयति सचेति इत्यंतःकरणस्य प्रादुर्भावः अहंकारतद्धर्मादिविषयकं ज्ञानं
यद्वा आत्मस्वरूपाय [illegible] अहंकाराद्विसाक्षिचैतन्यं तस्य विपरिलोपो न विद्यते इति श्रुतेरर्थः उक्तस्तु
क्तेर्थे उपपत्तिमाह सकलेति सकलस्य प्राणिमात्रस्य यो अंतःकरणतद्धर्मविषयकोनुभवः अथ
वा सकलस्य विषयस्य योनुभव इति समानाधिकरणं सिद्धांतेनुभवस्यैकत्वात् तस्योत्पादकं विनाश
कंच किमपि न संभवतीत्यर्थः सुखज्ञानस्य कारणमिच्छतां मनःसंयोगादिरेव कारणं वक्तव्यः
न च तद्युज्यते सकलस्य निज्ञांतःकरणधर्मज्ञानस्यैकत्वेन ततः पूर्वमपि तस्य सत्वात् एवं वि
नाशकस्याप्यसंभवः त्वदीयद्वीनाशकत्वाभिमतानामंतःकरणधर्मांतराणां तरकालेपि तज्ज्ञा
नस्य सत्वात् सुखादिज्ञाने उत्पत्तिविनाशशून्यानुभवस्तु विषयविषयक इत्युक्तं न केवलं उत्पत्तिवि
नाशयोः कारणासंभवः तत्र प्रमाणमपि नेत्याह अद्वैतेति अद्वितीयो योंतःकरणतद्धर्मा
नुभवः तत्कारणे साक्षिसाधकाभावं स्थापयति नाशसाधकप्रमाण[illegible]न इत्संभवेदेहेतुग

अद्वै.टी नैविशेषणं अहंत्वेन निःसर्वस्य साधकोऽनुभवः सोऽप्यद्वितीयः तस्य नाशो वा कोऽन्यः तन्नाशसाधकः
स्यादिति भावः वक्ष्यमाणं घटाद्यनुभवे नैस्यापि सुखाद्यनुभवतया नेदमभिप्रेतम् अनुभवस्याद्वैतत्व
मुक्त्वं नाशस्सिद्धिः स्वतः परतो वेति विकल्पं तं निरस्याद्यं निरस्यति नदीति उत्पत्तिर्विनाशो वा स्वस्य
स्वयंप्रकाशत्वेन स एव सर्वदा स्वस्य स्फुरणात्मकः अनुभूत्युत्पत्तिनुभव इति अस्माद् इदमेव वा सा
धितं स्यात् भावभूतस्य प्रकाशस्याभावरूपत्वासंभवाच्चेति भावः नैवात्र कश्चिदहंकारस्त
द्धर्मी निरिक्ते नित्यचैतन्ये विविदितव्यं तथाहि अस्तिना यद्धारावादिक ज्ञानोत्तरकालं भगव
द्ध्यानोत्तरकालं वा एतावन्तं कालं घटो मया ज्ञातः भगवान् मया ध्यात इति ज्ञानधारात
त्कालीनाहंकारयोः स्मरणं तच्च स्वविषयानुभवं विना नोपपद्यत इति सर्वसंमतं स च
अनुभवः किं ज्ञानधारासमनन्तरमुत्पन्नो धारान्तरालीयमहंकारं च विषयीकरोति किं
वा धारामध्ये तत्तत् ज्ञानोत्तरकालोत्पन्नो नानाभूतस्तो विषयीकरोतीति निरूपणी

पत्रं २

यं तत्राद्यो न संभवति धारासमनन्तरोत्पन्नेनैतस्य प्रत्ययस्य धारायाः समानकालीनस्य तद्विष
यत्वायोगात् द्वित्रिक्षणावस्थायि विज्ञानसमुदायात्मिकाया धारायास्तदुत्तरभाविविज्ञानका
लेऽसत्त्वासंभवात् असतश्चासाक्षात् ज्ञानविषयत्वायोगात् न द्वितीयः धारात्वविलोपप्रसं
गात् धारा नाम विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययसमुदायलक्षणा सा कथं मध्ये
विजातीयज्ञानस्वीकारे स्यात् न चैतावन्तं कालं घटो ज्ञात इति ज्ञानं न स्मृतिरूपं किंतु धारानुमिति
रूपमिति वाच्यं तद्व्याप्तलिंगाभावात् न च धाराविषयार्थस्मृतिरेव लिंगं लिंग आस्यापि प्रति
संधानेऽपि जायमानत्वात् तस्मात् ज्ञानधारातत्कालीनाहंकारस्मरणानुरोधेनाहंकारधर्मा
तिरिक्तं ज्ञानधाराविषयकं तत्कालीनमेकं ज्ञानं स्वीकर्तव्यं एक एवाजन्यज्ञानं ध्यानवस्था
नादजन्यत्वं च न सुवचत्वं किंच निद्राणस्यतावत् स्वापगतादिज्ञानमस्तीत्येव न स्मृति
रूपं अपरोक्षानुभवत्वात् [illegible] दिसुप्तं चक्षुरादीनामुपरतत्वादिन्द्रियजन्यं तत्संभवति
नापि मनोजन्यं तत् मनसो ज्ञानकरणत्वस्य निराकृतत्वात् तस्मात् स्वात्मपदार्थप्रका

अद्वै.टी गार्थमपि तत् स्वीकर्तव्यं किंच सुखमहमस्वाप्सं न किंचिदवेदिषमिति सुषुप्तिकालीना
ज्ञानसुखयोः स्मरणमस्ति न जनकानुभवोप्यहंकारधर्मातिरिक्त एव वक्तव्यः अहंकारस्य
७२ तदानीं लीनत्वात् न च सुषुप्तौ कारणाभावात् सुखमेव नास्तीति वाच्यं साक्षिरूपात्मसु
खस्य सर्वदा सत्त्वात् तर्हि जाग्रत्यपि कथं न भासते इति चेत् सत्यं भासत एव किंतु तीव्रवायु
विक्षिप्तप्रदीपप्रभावत् उद्भूतविषयवासनाजालविक्षिप्तमनसो न स्फुटं तज्ज्ञा
नमित्याहुः न च सुषुप्तिकालीननित्यज्ञानानुभूतसुखानां कथं स्मृतिः विनाशिज्ञान
जन्यसंस्काराभावादिति वाच्यं तत्रापि सुखादिस्मरणान्यथानुपपत्त्यैव विद्यावृत्तिः सुखा ७२
द्याकाराविद्यतद्वृत्तिसुखसाक्ष्यज्ञानानां स्मरणसंभवात् इत्याहुः अपि च अहंकारध
र्मातिरिक्तनित्यज्ञानाभावो वादिना ज्ञानसुखयोः कार्यकारणभावग्रहो वक्तव्यः कृत्ना
र्थिनः साधनत्वेन ज्ञाते धर्मे प्रवृत्तेः स च साध्यसाधनभावग्रहः अस्मदभिमतसाक्षि
ज्ञानं विना न संभवति तथाहि नित्यज्ञानानंतरं तावद्वैषयिकसुखं जायते तस्य ज्ञानस्य सु पत्र ६

तथा च खसामग्रीत्वात् उत्पन्नं च सुखमवश्यमनुभूयत एव अननुभूयमानसुखसद्भावायो
गात् तथा च सुखानुभवकाले ज्ञानं नष्टमेवेति ज्ञानसुखयोरेकदानुपस्थितेः कथं तयोः
कार्यकारणभावग्रह इति स्वीकृते तु नित्यसाक्षिणि तेन ज्ञानसुखयोस्तयोः पौर्वापर्यस्य
च ज्ञानसंभवात् सुलभः साक्षिणा तयोः कार्यकारणभावग्रह इति सिद्धेवं ज्ञानाहंका
रतद्धर्मादिसाक्षिणि बाह्यघटादिज्ञानमपि स एव यद्यपि घटादौ सत्यपि विनाशव्य
तिरेकेण चक्षुराद्यन्वयव्यतिरेकानुविधायि घटज्ञानं सत्यपि विनाशावनुभूयेते
इति घटज्ञानं नास्ति नित्यं तथापि तस्यान्तःकरणपरिणामरूपत्वे जडतया वस्तुतो
ज्ञानरूपताभावात् तदभिव्यक्तं घटावच्छिन्नचैतन्यमस्यैव ज्ञानत्वात्तस्य च साक्षिण
नित्यसुखादिविषयकसाक्षिचैतन्यभेदे प्रमाणप्रयोजनयोरभावात् इति न्यमेव
तत् कथं तर्हि चक्षुरादिजन्यान्तःकरणपरिणामे ज्ञानशब्दप्रवृत्तिः कार्थता

अद्वै॰टी ७३ तः करणपरिणामस्य ज्ञाने संबंधित्वेन भवन्मते ज्ञानत्वस्येव ज्ञानपदवाच्यत्वाविरो
धात् इति वृद्धोक्तं भवतु विषयज्ञानमनाद्यनंतमेकं तथाप्यात्मनो रूपत्वमितीयां
को हेतुः तत्राह स एवेति साधितो यो विषयानुभवः स एव सर्वजीवानां आत्मास्व
रूपं यतः तस्मात् आत्मा तद्रूप इति भावः विषयानुभवात्मनोऽभेदे भेदस्यादिकप्रमा वा ४
णाभावं हेतुमाह उक्तेति न चैकस्यानुभवस्यानेकजीवैः कथमभेद इति वाच्यं जीवाना
मंतःकरणोपाधिकभेदवत्त्वेपि वास्तवभेदाभावादविरोधात् ज्ञानात्मनोर्भेदप्रमा
णमाशंक्य निराकरोति ममेति वक्ष्यमाणचक्षुरादिजन्यांतःकरणवृत्तिविषयत्वं तद
वे वच्छिन्नानुभवविषयत्वं तस्यार्थः किमर्थं वृत्तिः किमुपादानं चेति वीक्षायामाह ७३
वृत्तिश्चेत्यादिना घटादिज्ञानार्थी तावत् चक्षुरादीन् व्यापारयति तद्व्यापारस्य च
उक्तनित्यघटादिचैतन्यैर्नुपयोगाच्चक्षुरादिद्वारा निर्गतांतःकरणपरिणामेऽज्ञा

पत्र ५

नपदवाच्ये उपयोग इति प्रयोजनांशमाह इदं इति इदं घटाद्यवच्छिन्नचैतन्य
निष्ठकपत्वादज्ञानवादे इति ज्ञानत्वं वस्तुतस्तु विषयावच्छिन्नचैतन्यावरणनिवृत्त्यर्थे
इति मंतव्यं निवृत्त्यर्थेचेति चकारेण विषयावच्छिन्नचैतन्येन साक्षिपरणार्थत्वमपि
वृत्तेः सूचयति यद्यपि घटाद्यवच्छिन्नचैतन्ये नावरणमस्ति न च चक्षुर्द्वारा निर्गतांतः
करणवृत्त्या घटावच्छिन्नचैतन्ययोरंतःकरणावच्छिन्नत्वानवच्छिन्नत्वप्रयुक्तो भेदो
निरस्यते चैतन्यांतःकरणावच्छिन्नत्वेन तदानकृतावरणमपि निरस्यते इति तत्रोभ
यार्थवृत्तिर्निर्वक्तुं यत्र च गदर्गीशनासु वयादौ संशयाभावेनावरणं नास्ति तत्र नि
र्गतांतःकरणवृत्तेरुक्तभेदनिरासरूपं विषयावच्छिन्नचैतन्यांतःकरणावच्छिन्न
साक्ष्यभेद एव प्रयोजनं अन्यथा तदापरोक्ष्यानुपपत्तेः अनावृतस्य साक्षिसंविता
दात्म्यस्यैव विषयापरोक्षत्वप्रयोजकत्वादिति युक्तं प्रथमांशप्रयोजनवत्त्वं हे

अद्वै० टी० ७४ रिति ननु वृत्तिकार्यस्येंद्रियसंबंधेनापि संपादयितुं शक्यत्वात् किं वृत्त्येति चेत्
~~ननु तावद्वि न चैतन्यस्य वृत्तिकार्यस्येंद्रियसंबंधेनापि संपादयितुं शक्यत्वात् किं वृ~~
~~त्त्येति चेत्~~ न घटावच्छिन्नचैतन्यस्य वृत्तिनिर्गमनप्रयुक्तसाक्ष्यभेदं विना न घटस्य
घटादेः साक्ष्यभिन्नत्वरूपापरोक्षत्वायोगस्य पूर्वग्रंथे उक्तत्वात् एतेनरूपादानमा
हमन इति मनः परि[णा]मत्वे प्रमाणमाह कामः सङ्कल्प इत्यादि धीर्धीर्भीरिति अस्मिन् श्रुतिवाक्ये प
ठितानां कामादीनां मनःकार्यत्वप्रतिपादनात् इयमत्र प्रमाणमित्यर्थः
भेदे प्रमाणाभावे पूर्वोक्तसाक्षिचैतन्यस्यात्माभेदे प्रमाणं वक्तव्यं इति चेत् आत्मासा ७४
धि क्षितानुजायादभिन्नः आत्मत्वात् व्यतिरेकेण घटवदिति ननु आत्मा घटान्न भि
द्यते आत्मत्वात् व्यतिरेके घटवदित्याभासानुमानस्येति वाच्यं बाधा
बाधाभ्यां विरोधादि[त्य]भिप्रेत्यानुमानोक्तिः चैतन्यात्मभेदश्रुतिमपि प्रमाणय पत्र

त्मेत्यादिनाभावः पूर्वतस्मादन्नात्माहंकार इत्यादिनासाक्ष्यसाक्षिभेदेनाहंकारा

तिः प्रत्यनुभवेति अस्य जीवस्य आत्मैव स्वयमेव ज्योतिः प्रकाश इत्यर्थः अस्याः श्रुतेः
ज्योतिः कर्तृत्वमर्थ इति चेत् न ज्योतिः शब्दस्य तत्कर्तृत्वलक्षणायां गौरवप्रसंगात्
आत्मनः साक्षितानुभवरूपत्वाभावे बाधकमाह अन्यथेति ज्ञानरूपत्वाभावे आ
त्मनो ज्ञानविषयत्वं वक्तव्यं ज्ञानतद्विषयव्यतिरिक्तवस्तुनोऽभावात् तथा च घटा
दिवदनात्मनो भेद उक्तः अधुना उक्तन्यायेनात्मनो दृश्यत्वे सिद्धे दृश्यत्वाभावे
ऽपि भेदसिद्ध इत्याह एवमिति प्रकारांतरेणाप्यहंकारात्मनो भेदं साधयति दृ
श्यं परमित्यादिना आत्मा आनंदरूपत्वाद् अहंकारादन्य इति संबंधः अपि च एषः पूर्वोक्त
भेदहेतुसमुच्चयार्थः दुःखिन इति अहंकारविशेषणं विपक्षबाधकतर्कसूचनाय आ
नंदरूपस्यात्मनो दुःखाश्रयाहंकाराभेदे आत्मनो दुःखाश्रयत्वं प्राप्नोति न च सुखस्य
दुःखाश्रयत्वं संभवति विरुद्धयोराधाराधेयभावायोगात् अहं द्वेष्टि आत्मनः

अद्वै० ८ सुखरूपत्वे हेतुः परमेति आत्मा आनंदरूपः परमप्रेमास्पदत्वात् व्यतिरेके दुःखवत्
पुत्रादिकं चाप्यौपाधिकप्रेमास्पदमिति न व्यभिचारः न चात्मनि परमप्रेमास्पदत्वं दृष्टम
७५ नेति मानं किमात्मनः सुखरूपत्वं रुतं सुखं समवायित्व कृतं वेति विकल्पं सुखसम
वायित्वकृतमेवेति युक्तं अहं सुखीति तत्समवायित्व प्रतीतेः सर्वसंमतत्वात्
सुखरूपत्वे त्वात्मनो अहं सुखमिति प्रतीत्यापत्तेश्च अपि केचिदाहुरात्मनि परमप्रेमास्पदत्व
मेव नास्तीति देवसिद्धिः परमप्रेमास्पदसुखाश्रयत्वेनैव तस्य प्रेमास्पदत्वादित्यात्रं कार्ये
स्मात्मः परमत्वं नामानौपाधिकत्वं तच्च सुखसाधनत्वे आत्मनो न संभवतीत्यहं सुखसाध ७५
नस्येति सुखनिमित्तः प्रेमा यस्मिन्न् सुखनिमित्त प्रेमा तत्रैव सर्वस्यापि जंतोः सुखे
एव निरुपाधिकः प्रेमा तत्साधने औपाधिक एव स इति सुख समवायिकात्मन्यपि सो
पाधिक एव प्रेमास्पात् तत्त्वेनास्तीति भावः यद्यो अहं सुखी त्यात्मनः सुखसमवा पत्र ७

यित्वेन प्रतीतिरिति तदपि न्यायासि सुखरूपविचित्रतिर्षिं वक्ष्यादिकायाः सुषुप्तिके मो
पाधितीयात्मकचंदनादि विषयज्ञानजन्यायाः सुखपदवाच्याया अंतःकरणवृत्तेरधि
ष्ठानात्मा पन्नांतःकरणस्य च अहं सुखीति प्रत्यये धर्मधर्मिभावावभासनात् अं
तःकरणतत्तद्धर्मस्तु सुखात्मकस्य भेदे प्रमाणाभावे वा न्याय
धर्मधर्मिभावासंभवात् यदप्यहं सुखमिति प्रत्यायापादानं तत्किं अहंकारविशि
ष्टे सुखरूपत्वेनाभेदमुपक्रमे पाधितांतःकरणवृत्तिविशिष्टस्यैवात्माभेदेन उत्तिनस्या
श्रिणोरभेदेन नायः तयोरुपादानोपादेयभावेन चेदंसंसुख समवायित्वं वादेपि
नीलो घट इतिवदहं सुखरति प्रतीत्यापादनस्य उत्थानात् वस्तुतस्तु अहंकारवि
शिष्टेनैव तमेव तत्त्विविशिष्टस्यैतन्मस्य वदनापरीयस्यामायाः अहं सुखीति
मत्वर्थे योविप्रतीतियोग्यतयेवाध्यासादिदोषः न द्वितीयः तत्किंविवर्केनं भस्मा
त्वात् तथापि सदद्वैत्प्रतीतिवत् अहं सुखमिति प्रतीतिः किं न स्यादिति चेन्न्

अद्वै॰ टी॰ ७६ बाधत्वेऽप्ययं प्रतिबाधः सच्चिदानंदोऽहमस्मीत्यनुभवत इत्यापत्तेः नहि नीः
रूपविद्यावंतं ~~प्रति~~ यः अविद्यावंतं प्रति दृष्टं सुखस्याविद्याकृतत्तया
तत्प्रतीत्ययोगात् यदपि हेतुस्सिद्धिरित्युक्तं तदपि न रूपस्ये निरवयवे आत्मनि सु
खजनकमनःसंयोगासंभवेन परमप्रेमास्पदीभूत सुखसमवायित्वाभावात् नच नित्यसुख
समवायित्वमस्त्विति वाच्यं अप्रसिद्धांतापातात् नित्यसुखस्वीकारे च तस्मात् भेदे प्रमाणाभा
वाच्च आत्मनः सुखसमवायित्वेन प्रेमास्पदत्वे बाधकांतरमाह सुखसमवायिन इति येनात्म
स्वी॰ ४ नः सुखे स्वे समवायित्वं क्रियते तेनाहं दुःखीति स्याद् दुःखसमवायित्वमपि स्वीकर्तव्यं तथा च सुख प्रती॰ ४ ७६
निमित्तात् पुत्रादेरपेक्षया सुखसमवायिन्यात्मन्यधिकप्रेमवत् दुःखनिमित्तकंटकाद्य
पेक्षया दुःखसमवायिन्यात्मनि अधिको द्वेषोपि स्यादित्यर्थः एवं तावत् साक्ष्यस्याक्षि
भेदेन दृक्दृश्यभेदेन दुःखिपरप्रेमास्पदत्वलिंगक सुखरूपत्वासुखरूपत्वभेदेन पुत्र

च अहंकारात्मनो भेदः साधितः ~~[illegible]~~ इदानीं व्यापकत्वाव्यापकत्वेनापि स्फुटतिमवसंशयनयो
र्भेदमाह तथेत्यादिना श्रुतिप्रोक्तया सर्वव्यापितया प्रादेशिकात् परिच्छिन्नात् अहंकारादात्मा अ
न्य इत्यर्थः श्रुतिं दर्शयति एको देव इति एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरा
त्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेति ~~सर्वव्यापी सर्वभूतांतर~~
~~त्मा कर्माध्यक्षः सर्वभूताधि~~ अस्यायमर्थः आत्मनोऽद्वयभावत्वं निराकरोति देव इ
ति द्योतनात्मकस्वभावश्चिदेकरस इति यावत् आत्मनश्चिद्रूपत्वमभ्युपगम्यात्मभेदं येऽवद
न्ति तान्निराकरोति एक इति एकस्मिन् शरीरे एक एवात्मेत्यभ्युप[illegible]गमादेक इत्यपि दे
हात्मभेदो न निराकृतः स्यादित्याशंक्य एकत्वं विशिनष्टि ~~सर्वभूतेष्विति~~ सर्वभूतेष्विति सर्वभू छिन्
तेष्वेकः नतूपलिशरीरं इत्यर्थः स्वयंप्रकाशचिदेकरस एकत्वेन वर्तते चेत् तथा किमिति
भासते इत्यत आह गूढ इति सर्वभूतेष्वेकत्वेन स्थितोपि तदंतर्गूढत्वेन वर्तमानत्वात् तथा
न भासते इति यावत् मणिषु सूत्रवत् सर्वभूतोदरे कृदेशेवर्तित्वेनात्मनस्तैर्गूढत्वाभ्युप
गमे परिच्छिन्नत्वादिदोषः स्यादित्याशंक्याह सर्वव्यापीति आकाशवत्सर्व

अं॰ ६ मं तर्हि दिग्व्याप्तुं शीलमस्येति सर्वव्यापी नहि व्याप्यव्यापकभेदसद्भावादात्मनः सद्विती

७८ यत्वं प्राप्नोतीत्याशंक्याह सर्वभूतान्तरात्मेति सर्वभूतानामन्तः स्थितः सन् आत्मा स्वरू

पं अधिष्ठानमिति यावत् तत्श्च कल्पितः प्रपंचोधिष्ठानस्य न द्वैतापादक इतीति

भावः जगद्वैचित्र्यकारणीभूतकर्मणा ... प्रेरयितेत्युक्तं ... इत्याह कर्म

मपि स एव प्रेरयितेत्युक्तं तत्राह कर्माध्यक्ष इति सर्वपदार्थकल्पनाधिष्ठानत्व

यात्पांतरत्वेन छन्नत्वेप्यात्मप्रकाशः नहि जगदांध्यप्रसंगः स्यात् तत्राह सर्वभूता

धिवास इति सर्वेषु भूतेषु अधिवसतीति सर्वभूताधिवासः स्वाविद्यया स्वस्मि ७८

न्नध्यस्तप्रपंचे स्वस्यापि संसर्गितया अध्यस्तस्य जगद्भासकत्वमप्यस्तीति तत्स

प्रकाशकत्वं न विरुध्यत इति भावः प्रकाशकर्तृत्वे न प्रकाश ... न तर्हि विका

कत्वं चेत् नहि विकारित्वजडत्वादिदोषाः प्रादुःष्युरित्याशंक्याह साक्षीति साक्षात् स्ववि पत्र ९

निसत्ता

कारमंतरेण ईक्षते स्वसंनिधिमात्रेणादित्यवत् सर्वव्यवहारयोग्यं करोतीति साक्षी इति न विका

रित्वादिदोषप्रादुर्भाव इति भावः नन्वात्मनः प्रकाशरूपत्वे सिद्धे आदित्यादिप्रभावत् प्रकाशां

तरकर्तृत्वमंतरेण सर्वप्रकाशयेत् तदेव तु न सिद्धमित्याशंक्याह देवशब्दोक्तमर्थं स्पष्टयति

चेता इति अनेन चित्प्रकाशस्वभाव इति यावत् आत्मा प्रकाशस्वरूपत्वेन नित्यप्रका

शस्यापेक्षत्वात् मोक्षे तदभावेन न भायादित्याशंक्याह केवल इति चैतन्याभिव्यंजकत्वे वि

षयसापेक्षत्वेपि चिद्रूप आत्मा केवलः विषयनिरपेक्षः सर्वविषयशून्योपि यथादित्यः

प्रकाशते तद्वच्चिदात्मा मोक्षे विषयनिरपेक्षः प्रकाशत इति भावः ननु सर्वव्यापकत्वक

र्माध्यक्षत्वादयः एकत्वेन ईद्दनादि शक्तिमत्त्वाभाविकाश्चेत्तर्हि तासां मोक्षेपि सत्त्वेन पु

नरपि तत्कार्यस्यापरिहार्यत्वादनिर्मोक्षप्रसंगः स्यादित्याशंक्याह निर्गुण इति चश

अं॰ ६ ब्दः पूर्वविशेषणयोः समुच्चयार्थः आत्मनोनेतीति प्रतिषिद्धाशेषविशेषानंतमस्त

नेति

अद्वै.टी सुखचिन्मात्रवस्तुस्वरूपत्वतः कापि शक्तिर्नास्ति अखण्डत्वेनानंतशक्त्याभासस्तु अनंतशक्त्या
७८ श्रयमायैकाध्यासादित्यतो निर्गुण भावः ननु मायिकगुणस्वीकारे निर्गुणश्रुतिविरो
धः न च वास्तवगुणाभावपरा श्रुतिरिति वाच्यं वास्तवगुणाभाववाचकपदाभावात् सि
द्धांते आत्मातिरिक्तस्य सर्वस्यापि कल्पितत्वेन वास्तवगुणप्रसिद्धेस्तन्निषेधायोगात् न च
प्रतीयमानेषु गुणेषु ब्रह्मणि प्रसिद्धं वास्तवत्वं निषिध्यत इति वाच्यं निर्धर्मके ब्रह्मणि
वास्तवत्वस्याप्यप्रसिद्धेरिति निर्गुणश्रुतिविरोधस्तदवस्थ इति चेत् न निर्गुणत्वश्रु
तेर्हि आत्मनि कालत्रयेपि गुणात्यंताभावं स्तवयति स च त्रैकालिकगुणात्यंताभावः
स्वाधिष्ठाने आत्मनि मायिकगुणानामुपपन्न एवेत्याभासग्रंथे साधितइतिदिक् न चै ७८
कत्वे त्रिविधपरिच्छेदशून्यत्वरूपव्यापित्वे च श्रुत्युक्ते भेदप्रत्यक्षविरोधः शंकनीयः
अहंकाराद्युपाधिपरामर्शमंतरेणानुभूयमानभेदस्यौपाधिकत्वेन कल्पि
१०

तत्वात् श्रुत्युक्तस्वाभाविकैक्याविरोधित्वाद्स्वाभाविकेति अहंकारस्य परिच्छिन्नत्वासिद्धिमा
शंक्याह अहंकारश्चेति उक्तमिति अहमिहैवास्मीत्यादिग्रंथे आत्मनः श्रुत्युक्तव्यापकत्वेनुकू
लं तर्कमाह आत्मनइत्यादिना आत्मनो वैभविकत्वमपि व्यापकत्वमनिच्छतां मतेणुपरिमा
णो वा मध्यमपरिमाणो वा आत्मा स्यादिति विकल्प्याद्यं दूषयति अणुत्वइति कार्यस्य सम
स्तापि प्रदेशादन्यत्राप्यस्तेरिति भावः द्वितीयमाह मध्यमेति घटादौ तथा दृष्टत्वादिति भावः
पक्षद्वयसाधारणं दूषणमाह शरीरेति घटादौ सत्वमिव आपरोक्ष्यमपि चैतन्यस्यैव
तदन्यस्यानिरूपणात् तच्चैतन्यस्वरूपस्यात्मनः शरीरमात्रवृत्तित्वे घटादौ संबंधा
भावान्न स्यादिति भावः ननु कथं चैतन्यातिरिक्तापरोक्ष्यानिरूपणं अपरोक्षत्वं
वपरो. विषयत्वमेव घटादौ स्याद्वा किं न स्यादिति चेत् उच्यते किं नाम ज्ञाने अपरोक्षत्वं
जातिरूपमुपाधिरूपं वा आद्ये सा किं चैतन्यनिष्ठा उत घटादिनिष्ठा अंत्ये सुखादि

अद्वै० टी

७९

विषयकसाक्षिज्ञानेन दुःखाभावेन तद्विषयसुखादावपरोक्षत्वं न स्यात् नाद्यः सर्वस्यापिइ
दंरूपस्याज्ञानावच्छिन्नचैतन्यविषयत्वनियमेन सदा सर्वस्यापरोक्षतापातात् नाप्युपाधिकृ
तमपरोक्षत्वं तर्हि किं इंद्रियजन्यत्वं अन्यद्वा नाद्यः साक्षिविषयसुखादेरपरोक्षत्वाभा
वप्रसंगात् साक्षिणः इंद्रियाजन्यत्वात् ज्ञाने इंद्रियजन्यतावच्छेदकानिरूपणाच्च
ज्ञानत्वादेरनुमित्यादावपि सत्वात् नाप्यपरोक्षत्वं तस्यैव विचार्यमाणत्वात् नापि
द्वितीयः न चैतद्ज्ञानाकरणकज्ञानत्वं तर्हि तत्र लिंगपरामर्शस्य व्यापाररहितस्याक
रणत्वेन मनस एवानुमितिकरणमिति पक्षेऽनुमितावतिव्याप्तेः तस्मात् घटादावा
परोक्ष्यं चैतन्यमेवेति सिद्धं सर्वविषयसंबद्धं चैतन्यमात्मस्वरूपापकमिति तर्हि सर्वे
दा सर्वस्यापरोक्ष्यं स्यादिति चेत् किमेतद्भवं प्रत्यापाद्यते ईश्वरं प्रतिवा नाद्यः तं
प्रति विषयावच्छिन्नचैतन्यस्याविद्याछन्नत्वात् वस्तुतस्तु घटादौ जीवस्यापरोक्ष

उजी

पत्र ७९

पत्र ११

रीति

त्वव्यवहारप्रयोजकं अंतःकरणोपहितसाक्षितादात्म्यमेवेतिनातिप्रसंगः द्वितीये इष्ट
पत्तेर्हि किं तर्हि सिद्धांते ईश्वरापरोक्ष्यं अपरोक्षार्थविषयत्वमितिवदंति अर्थेचापरो
क्ष्यं सन्मात्रस्वरूपाभिन्नचैतन्यमेवेत्युक्तं चैतन्यस्यापरोक्षत्वं स्वतएव यत्साक्षादपरोक्षात्
ब्रह्मेति श्रुत्यासाक्षात् चक्षुरादिव्यापारव्यवधानेन अपरोक्षत्वं अपरोक्षमित्यर्थे सर्वांतरा
त्वावगमात् ननु घटादौ जीवस्यापरोक्षत्वव्यवहारप्रयोजकसाक्षितादात्म्यमित्युक्तं
घटाकारांतःकरणवृत्तिदशायां घटगतरसादीनां साक्षितादात्म्ये विद्यमानेपि तेषु अप
रोक्षव्यवहारादर्शनादिति चेन्न सत्यं साक्षिणोनावृत्तत्वेन विशेषणीयत्वात् घटो घटा
रसाद्यवच्छिन्नं चैतन्यं आवरणनिवर्तक तत्रेंद्रियजन्यांतःकरणवृत्त्यभावेन अस्ति न
मेवेतितद्भिन्नः साक्षात्कारवृत्त्यपरोक्षएवेति एवं च घटार्थो ब्रह्मात्मैक्ययोग्योऽहंकारादि
र्वेद्यत्वेऽविवः तत्रबाधकं शंकते न न्विति अहंकारसाक्षी अनात्मा अहमनुभवगोचर

न्वि

ब्रु

तदयुक्तं

स्यात् घटादिवदित्यनुमाने अहमनुभवश्चैतन्यं वा अहंकृत्निर्बाध्यमननुभवत्वरूपोपाधि
ग्रस्तं असंसारिणि निरहंकारे ईश्वरे अविद्यविच्छिन्नचोपाधेः साध्यव्यापकत्वं ॥ अनात्मरूपे
घटाद्यनुभवे असत्त्वादिति वाच्यं तस्यानुभूयत्वस्यैवाव्यत्वेपि अननुभवत्वस्योक्तसाध्यादि
त्याद्वनिति द्वितीये अहंकारादन्यत्वेपि विकल्पस्यात्मनः प्रामाणिकाहंकारभेदसत्वादहमनुभ
वगोचरत्वमसिद्धमित्याह वस्तुत इति आत्मनोहंकाराभेदाभावेपीति संबंधः तस्मि
न् आत्मनि अहंकारस्याध्यस्तत्वेन हेतुना अभेदेन आत्माहंकारयोरेकत्वतादात्म्यमित्ये
भेदाभावेपि वमाकारानुभवोपपत्तेः वास्तवाभेदाभावेपि अभेदभानेदृष्टांतः मुंजेषीकयोरिति मुं ८०
जस्थूलवित्येषः प्रसिद्धः इषीका तदंतर्गतः सारः अहंकाराधिष्ठानातिरिक्तमनुभवंव्याव
र्तयति स्वसामर्थ्येनेति स्वप्रकाशत्वेनात्मसामर्थ्येनेत्यर्थः स्व[illegible]प्रकाशत्वेनात्माध्य
समंतरेणाहंकारज्ञानमेव न स्यादित्याह अन्यथेति नन्वहेतुमाह तत्कारणस्येति अहं

अहंकारविषयकानुभवकरणस्येत्यर्थः किंचोक्तयुक्त्यात्मनः करणत्वधर्मप्रकाशरूपं ज्ञान
मेकमनाद्यनंतमित्युक्तं तत्कथं करणजन्यं स्यादित्यभिप्रेत्याह तज्जन्यानं नेति तज्जन्यकर
णजन्यः करणसंजन्योसि रुद्धस्याशंक्याहज्ञानपरिणामिन इति ज्ञानोपादानत्वं च मनसः
काम: संकल्पइत्यादिश्रुत्या चक्षुरादिव्यापाराधीनत्वात्पस्य कर्तृत्वमपि सुक्तं एवं चाहं
हंकारात्मनोर्भेदं युक्त्या प्रसाध्य कठवल्लीश्रुत्यापि तं साधयति अंगुष्ठेति श्रुतेरयम
र्थः अंगुष्ठमात्रः अंगुष्ठपरिमाणः अंगुष्ठपरिमाणं हृदयपुंडरीकं तच्छिद्रवर्तंतःकरणोपा
धिस्तच्छादात्म्यापन्नोंगुष्ठमात्रः पुरुषः अंगुष्ठमात्रवद्वाय योंतरवर्त्यात्मा सदा पुरुषः पूर्णः
अंतरात्मा प्रत्यगात्मा सदा जनानां संबंधिनि हृदये संनिविष्टः तं स्वात् आत्मीयात् शरीरात्
प्रवृहेत् उद्धरेत् निःकृष्य पृथक्कुर्यात् इत्यर्थः किमिवेति अतो नीयात् शुक्रं शुद्धं अ
मृतं नित्यं यथोक्तं ब्रह्म शुक्रममृतमिति हि रुक्तिर्ह्येति परिसमाप्त्यर्था इति भाष्यकारैरुक्तोर्थः
उच्यते मुंजादिवेषीकां अंतरस्थां धैर्येणाअप्रमादेन तं शरीरान्निष्कृष्य चिन्मात्रं विद्यात् २

अं॰टी अन्तु क्रमहंकारात्मविवेकं स्फुटयति। अत्रैति अस्यांश्च तौ अंगुष्ठमात्र इति अनेन परेणैस्यर्थः
८० दात्म्यं ऐक्याध्यासो तस्यात्मनः नन्वंगुष्ठपरिमाणकांतःकरणोपाधिकं परिच्छिन्नत्वं कि
मित्यात्मनो वर्ण्यते तस्वाभाविकमेव किमिति नस्मात् इत्याशंक्य श्रोत पुरुषपदसूचितव्याप
कत्वामथानुपपत्तिं प्रमाणमाह अमथेति अहंकारतादात्म्याध्यासाभावे तदनुपपन्नेः
अंगुष्ठमात्रत्वानुपपत्तेरिति सर्वं निःकृष्टउक्तारितः अहंकारोयस्मादात्मनः [illegible]निःक्र
ष्टाहंकारः तस्मद्दृष्टपत्वं तांतिं वारयति। स्वप्रकाशमिति व्यापित्वात्। दोषकृत्यंतरं प्रमाण
यति सर्वव्यापीति प्रकृतश्रुत्यर्थान्यथानुपपत्तिमपि व्यापकत्वे प्रमाणमाह सदाजना
नामिति अस्मिन्नेवाक्ये जनानामितिवहुवचननिर्देशात् सर्वहृदयेषु संनिविष्ट ८०
त्वमुक्तं तच्च व्यापकत्वं विना न संभवतीति भावः आत्मनो हृदयतादात्म्येन सर्वदाव
स्थाने श्रौतं लिंगमाह अत एवेति यतोंतःकरणतादात्म्यमात्मनः सर्वदैवास्ति १३

अत एव श्रुतिस्तद्विवेचनार्थं यत्नमाह मात्रादार्थक्ये नधीरत्वरेनाविधत्ते तादात्म्येनानवरता
समानयोर्विवेचनेयत्नापेक्षणात् अत्यंतराधर्यपर्यालोचनायामपि अहंकारात्मनोराध्या
सिको भेदोभेदश्चावगम्यत इत्याह ~~अपेक्षादिना अथेदं आध्यासिकाभेदं अथवेदनकर्तुरेव~~
~~[illegible]~~ अपेक्षादिना अथेदं आध्यासिकाभेदं अथवेदनकर्तुरेव प्रतिकर्तृत्वप्र
ती तीतेरन्यकर्तुरेकीं दर्शयति प्रतिवेदनकर्ताऽस्म्यहंकारात्मनावेवेति तयोराध्यासि
काभेदः प्रतीयत इति भावः ननु अभेदावगतौ सत्यां भेदावगति हेत्वभावात् सा पारमार्थि
काभेदविषयैवास्त्वित्याशंक्याभेदावगतिहेत्वभावो मिथ्य इत्याह घ्राणेति रिक्तेति क्रियाद्व
योपादानमेवक्रुप्तैदावेदकमिति भावः ननु घ्राणः स्वसमवेतं यत्र भ्रांतिविषयकं ज्ञानं तेन स्व
याद्क्रत्वरूपस्वसाक्षित्वसंभवात् घ्राणदृक्साक्षियोः क्रियाद्वयोपादानेन कथं भेदः
सिद्धो दिस्याशंक्य [illegible]स्वसाक्षित्वं कर्मविरोधादनुव्यवसायस्य दूषितत्वादात्मसम

अन्यथेति

अद्वै० टी० वेत् ज्ञानकारणमनःसंयोगासंभवस्य चोक्तत्वात्तेन युक्तं बाधकांतरमप्याह अस्मिन्नहि
८२ याकं कार्यकरणसंघाते परमार्थिकस्वरूपप्रतिपिपादयिषितं तत्रैलक्षण्येनैव तर्हि भ्रांति
कर्तार्थः स आत्मैवेतावत्तु केपि प्रत्यक्षविषयकासंदिग्धज्ञानसिद्धेरतिरिक्तं न हेतुनकर्तृ
रूपाद्यानं वर्यतत्र हेतुः तस्मैयेति भ्रांतिकर्तुरेवेत्यर्थः किंच अहंप्रत्ययपर्यालोचनयापि
तद्विषयस्याद्विरूपत्वमित्याह केवलजडत्वादिना किमयमहमित्यात्मप्रत्ययः केवलाहंका
रविषयः केवलात्मविषयो वा नाद्य इत्याह केवल इति अयोगे हेतुः जड इति अहंकारः
स्वीतिप्रत्ययविषयस्य स्वप्रकाशत्वासंभवात् जडत्वं तस्माद्भूयकं जडस्य दर्पणत्वेनानात्मत्व ८२
नियमात्तथात्मप्रमानमाभवत्येवेत्यर्थः न द्वितीय इत्याह सुषुप्तीति माहत्तस्माज्ज
यमानस्य आत्मानावत् कृतहान्यादिदोषप्रसंगभयेन नित्यः स्वीकर्तव्यः अना
त्मत्वभीत्या च स्वप्रकाशः एवं भूतस्य चाकंचेदहमाकारं तर्हि सुषुप्तावपि तथा भान

४ वेति एवं शरीराद्यहंकारांतेभ्यस्तं पदार्थेभ्यो विलक्षणः कृत्स्नतत्त्वप्रतीय ४

सुषुप्सा
अद्वै० टी० मादस्वाप्सं वित्ति सुषुप्तिकाले सकले विलीने इति स्वमपीतो भवतीत्यादिवाक्यैरात्मोपाधेः
८३ सुषुप्तौ लयश्रवणात् तस्मादहमित्यात्मप्रत्ययो न केवलजडं नापि केवलात्मानं विषयीक
रोतीति सिद्धमस्याः प्रतीतेर्जडात्मोभयविषयत्वं इत्यहंकारातिरिक्तएवायमात्मा
इति फलितमाह अहमनुभवेति ~~प्रतीतेर्जडत्वात्मोभयविषयत्वं इत्यहंकारातिरिक्त एवाय~~
मानाधर्मास्तत्पदार्थाभेदविरोधिनः प्रमातृत्वादयोऽपि बाधानसंतीत्याह एवंचेति आत्म
नोहंकाराद्भिन्नत्वे सतीति यावत् आत्मानमाप्नोतेत्यनेन संबंधः प्रमातृत्वाद्यनुभव
म न्यथयेति अहमर्थ इत्यादिना अहमितिप्रतीयमाने विषये इत्यर्थः प्रमातृत्वादीत्यत्रादि ८३
पदेन प्रमातृत्वाश्रयो गृह्यते अहंकारस्त्वप्रमाता तद्धर्मः प्रमातृत्वंच तदुभयवि
षयत्वेत्यर्थः अनुकूलभ्यातिरिक्तप्रमाणसंस्कृतवशांकानिराकरोतीति तदन्येति न चात्मा
प्रमाता आत्मत्वात् व्यतिरेके घटवदित्यनुमानं इति वाच्यं अहंकारविशिष्टे तत्साधनासि

१७
मावस्थकंसामग्रीसत्वात् नचतथा दृश्यतइति अहमित्याकारंज्ञानं नकेवलात्मनइत्यर्थः
नचास्त्वेवसुषुप्तावप्यहंकारज्ञानं अन्यथासुखमहमस्वाप्समितिसुप्तोत्थितस्याहंकाराश्रया
श्रितसौषुप्तिकसुखस्मृतिः कथंस्यात् अननुभूतेनत्दयोगात् इतिवाच्यं जाग्रत्कालीनाहं
कारशाश्रयस्यैवस्मर्यमाणसुखेप्रतीतेः सुषुप्तिकालेसकलेविलीनेइत्यादिश्रुतेः ननुसु
सुषुप्तावहंकाराभावेनाहमनुभवाभावेजाग्रतिकथमहंकाराधिकरणिकासुखस्मृतिरु
त्पद्येत अनुभवस्मृत्योः समानाधिकरणत्वनियमादितिचेत् नो अधिष्ठानविशिष्टत्वस्यानुभ
वस्मृत्योः सत्वात् तदानींसूक्ष्माहंकारसद्भावादपितयोः सामानाधिकरण्यसंभवा
च्च किंचसुषुप्तौयदिस्यात्सोहंकारः स्यात् तदास्वप्नाद्यनुभूतगजाद्यहंकारवत्सुषुप्ति
कालीनोविशेषवानपिकदाचिदस्माभिःस्मर्येत नचैवतथास्ति तथोचोक्तं तथाच
विशिष्टस्मर्यतइत्स्तनइवाहंकारइति केवलाहंकारस्यात्मप्रमाविषयत्वेपुक्तं तर्ह

ह्यसाधनात् तदुक्तस्यैवत्रिविधपरिच्छेदशून्येतत्सामानेबाधात् निर्धर्मकेजस्वेआत्मत्वहे
तोरसिद्धेश्च नचधर्मिसमधर्मविशिष्टानित्यभियुक्तवाक्यं आत्मनः प्रमातृत्वेमानमितिवा
च्यं तस्मात्यहेतुप्रतिविरोधेनाहंकारादिविशिष्टस्यैवप्रमातृत्वेतात्पर्यात् स्वरूपचैतन्यस्यप्र
मातृत्वाभावेनुपपत्त्यभावाच्च उक्तन्यायंकर्तृत्वभोक्तृत्वाभावेप्यतिदिशति अतएवेति
कर्तृत्वादिप्रतीतीनामहंकारोपाधिकत्वादेवेत्यर्थः आत्मनः प्रमातृत्वाद्यभावेहेत्वंतरमाह नि
रवयवत्वेति तन्निमित्तः प्रमातृत्वादिनिमित्तः संयोगाभावेहेतुं निरवयवेति प्रमोस्यनिरवयवत्वेनु
पपन्नत्वापि दूषणमाह नचेति कथंचमादिना संबंधसंभवइत्याशंक्य गुणगुणिवादपुप
मेनयुतसिद्धत्वाभावात्संयोगोनसंभवति समवायंप्रत्याह समवायस्येति तस्यसमवाय
स्यतदीयत्वं आत्मीयत्वं आत्मनः समवायस्यात्मसंबंधमिद्धत्तितस्यादयुतसिद्धत्वात्संयोगा
संभवेनसमवायएवतयोः संबंधइत्यभ्युपगंतव्यं तत्रचानवस्थास्यादित्याह
समवायइतिषष्ठ्यर्थोल्लेखिप्रत्यया समवायस्यआत्मसंबंधित्वं वक्तव्यं तच्चनसंभवतीत्यर्थः २५

अ॰ टि॰ ३ संबंधेवेति तस्य समवायात्मनोः संबंधस्य किंचार्थे समवायोऽजन्यो वा आद्ये द्वितीये तु
८४ समवायानवस्थापत्तिर्दोषमाह एवमिति भावकार्यस्य समवायिकारणजन्यत्वनियमा
त् समवाय [illegible] स्य तु सदृष्टान्तेन निमित्तमात्रजन्यत्वस्यैव तु मन्तव्या
त्वात् तस्य स्वोपादाने समवाय एव संबंधो वक्तव्यः एवं तस्य तस्यापीत्यनवस्थेति भावः
द्वितीये सकिमेकोऽनेको वा आद्ये तिप्रसंगइत्याह ऋद्ध्येति वाय्वादिनिष्ठस्पर्शसमवाय
स्य रूपादि समवायाद्भेदेनैतत्रापि रूपादिमत्त्वमत्त्व प्रमेस्यादिति भावः नच वायुनिष्ठ
समवाये रूपनिरूपितत्वाभावान्नोक्तदोष इतिवाच्यं रूपनिरूपितत्वस्य समवायस्वरूप
दतिरिक्तस्यानंगीकारेण तस्यापि वाय्वादिनिष्ठसमवाये सत्वात् किंच अभावं नंनं ८४
अभाव्यं समवायं तस्य चाति प्रसंगवारणाय तत्तत्संबंधिनिरूपितत्वं चेत् तर्हि स
द्भिः किंचित् क्लृप्तमेकमाकाशादिकं वस्तु समवायस्थाने ऽभिषिच्यतां तदेव तत्तत्संबं
१६

धि
धिनिरूपितत्वाकारेण समवायस्तत्तत्सकलविशिष्टव्यवहारं जनयिष्यति अतः समवायेन
नाप्यजन्यो नैकश्चेति द्वितीयः पक्षः संबंधोऽपि संबंधिस्थित्यधीनस्थितिकः सकलसंबंधु ४८
सत्त्वेः पूर्वं तन्नाशे तस्य स्वस्मात् इत्यत्राभिप्रेत्याह संबंधुसत्त्वेऽरिति प्रागिति हुंसकालस्य
प्युपलक्षणं अपिनाप्रथमपक्षेऽपीमं दोषं समुच्चिनोति किंच स्वरूपाणामनेकत्वेन स्वरूप
संबंधातिरिक्तं समवाय मितत्वात्त्वयातस्याप्यनेकत्वं कल्पनमनुचितं कल्पकस्य नागौ
रवं तस्मात् त्वं पदजन्ये ऽद्वितीये ब्रह्मणो भेदयोग्यताविघटकान्यान् [illegible] धर्मान्निरूपा
रोति एवमिति आत्मभिन्नस्य धर्मस्य निरवयवे आत्मनि संयोगासंभवात् समवायस्यैव
निरस्तत्वात्संबंधासंभवेन आत्माभिन्नस्य वस्तुनरांतरसंबंधेन संबंधव्यतिरिक्त धर्मध
र्मिभावासंभवेनात्मा निर्धर्मक इत्यर्थः किंच भिन्नयोर्द्वयपरयोर्धर्मधर्मिभावोऽदृष्टे संभवा
द्विवस्तुतरं तदसंभवात्तत्त्वभेदाभेदस्य च विरोधेना संभवाद्वात्मा निर्धर्मक एव तर्हि

अद्वै॰ टी॰ धर्मधर्मिभावः सर्वत्र दृष्ट इति चेत् सत्यं पारमार्थिकप्रपंचवादिनामेव धर्मि

८५ व मायावादिनां तु कार्यस्य निर्बाधतासंभवात् धर्मधर्मिभावो युक्त एव उक्तश्रुत्युपोद्बलितं कठ २

निर्धर्मकत्वप्रतिपादकं श्रुतिद्वयमाह तथा चेति केवलो निर्गुण इति श्रुत्यंतरं आत्मनोऽ

संगत्वे कर्तृत्वभोक्तृत्वादिसंगानुभवविरोधपरिहारं आह ईश्वरमात्मेत्यादिनोक्तं स्पष्ट मर्थे ४

यति तथापीत्यादिना अयं निर्धर्मकः आत्मा काल्पनिककर्तृत्वादिधर्मवत्त्वप्रतीत्या पारमा

र्थिकनिर्धर्मकत्वविरोधो नास्तीति भावः कर्तृत्वादिधर्माणामपारमार्थिकत्वे युक्त्यंतर गर्भे ६

माह अत एवेति यतः कर्तृत्वादिसंसारोऽहंकारोपाधिको मिथ्याभूतः अस्मादेव हेतोरि

त्यर्थः अन्यथा सत्यस्य आत्मवत् निवृत्त्ययोगात् ज्ञाननिवर्त्यत्वं सत्यस्य विरोधतोऽसं ८५

भवात् इत्यर्थः ज्ञानेन बाधनेनेति भावः बृहदारण्यकश्रुतिभ्यां कामादीनां मनउपादा

नकत्वं प्रतिपादनादपि न ते आत्मनो धर्मा इत्याह कामइति आदिपदेन मन एवेसं १७

तस्य ग्रहणं तत्रांतःकरणपर्यायमनःशब्दस्य कामादिपदसामानाधिकरण्येन तद्धर्मियो

रुपादानोपादेयभावं दर्शयति कामा येऽस्य हृदि श्रिता इत्यत्र हृदस्य अंतःकरणपर्याय हृदि

श्रितत्वं च तदुपादानत्वं इति अहंकारधर्मत्वमेव कामादीनां नात्मधर्मत्वमिति भावः

कर्तृत्वादेः संसारस्यावास्तवत्वात्मनि सत्त्वानावेशकत्वं तस्यार्थानुपपत्तिमपि प्रमाणयति अ

न्य एवेति यतो नात्मनो वास्तवः संसारः अत एवेत्यर्थः अन्यथा मुक्तेः सर्वमुक्तात्मनो

न स्यात् अवास्तवत्वे तु संसारस्य स्वसमानाधिकरणनिवृत्त्यंताभावप्रतियोगि

त्वात् तदुपपत्तिर्मुक्तेरित्यर्थः एवं तथाहि देहो न जीवत्वादि ग्रंथेन सदार्थलक्ष्याभेदयोग्य

त्वं पदार्थं तस्य परिशोध्य एतदेव सदादिस्वरूपं ब्रह्मैक्याद्युक्तमर्थं निगमयति एव

मित्यादिना एवंविधं कामाद्यशेषसंसाररहितत्वं पदार्थमात्मानं [illegible] नमुपादाय तत्त्वा

अद्वै.टी मसिवाक्यं कर्तृ तत्सदस्यत्वब्रह्माभेदं प्रतिपादयतीति संबंधः निर्धर्मकस्यात्मनो वि
८६ शिष्टवाचकत्वं पदार्थभेदः कुत इत्यत आह लक्षणयेति तत्त्वंपदं विशिष्टवाचकं यद्य
पि भवति तथापि लक्षणया एवंविधं पदार्थभेदः कुत इत्यत आह लक्षणयेति चं
पदं विशिष्टवाचकं उपस्थापयतीत्यर्थः तत्पदार्थलक्ष्यस्वरूपमाह अद्वितीयेति
निर्विषयो विषयाज्ञमोचः आनंदः तत्त्वंपदलक्ष्ययोरभेदप्रतिपादने कथं वाक्यस्य
सामर्थ्यमित्यत आह तत्त्वमसीति तत्त्वंपदसत्तत्सद सामानाधिकरण्येनेत्यर्थः अत्र पदद्वयोः ८६
सामानाधिकरण्यं नाम वाक्यतात्पर्यकथनं तच्चोपक्रमोपसंहारादिषड्विधतात्पर्यलिं
गैरवगंतव्यं एकार्थत्वं चाखंडार्थत्वं तच्च पर्यायपदानामेकप्रातिपदिकार्थत्वं एक
स्य प्रातिपदिकस्य अर्थ एवार्थो येषां तानि एकप्रातिपदिकार्थानि तेषां भावः एक १८
प्रातिपदिकार्थत्वं अत्र अपर्यायेति पदविशेषणाभावे दूषणं कलशः इत्यादि ७

पर्यायपदसमुदाये ऽप्यतिव्याप्तिः स्यात् तत्परिहारार्थं तत्र ग्रहणं यद्वा समभिव्याहृत
तत्परोपस्थापितपदार्थसंसर्गगोचरप्रमाजनकत्वमखंडार्थत्वं यत्किंचित्संसर्ग
गोचरप्रमाजनके देवदत्त मानय इत्यादि सखंडवाक्ये ऽतिव्याप्तिपरिहारार्थं समभिव्याहृ
तेत्यादिपदार्थविशेषणं तच्चाखंडवाक्यं द्विविधं एकपदार्थप्रतिपादकं सत्यादिवा
क्यं जीवपराभेदप्रतिपादकं च तत्त्वमस्यादिवाक्यं तदुभयं च एवंविधमित्यादि ग्रंथेन
सूचितं तदुभयं प्रसंगाद्विचार्यते ननु सत्यादिवाक्यं मुख्यवृत्त्या एकप्रातिपदिका
र्थं प्रतिपादयति लक्षणया वा दंडी कुंडली त्यादिवत् सत्त्वविशिष्टे ज्ञानवैशिष्ट्य
प्रतिपादकत्वेनापि तदुपपत्तेः वाक्यस्याखंडार्थता दुर्लभा अत एव द्वितीयस्त
क्षणमप्यसंभवि वाक्यस्य सतः परोपस्थापितपदार्थसंसर्गगोचरप्रमाजनकत्वनियमा
च्च तस्मात्सत्यादिवाक्यं नाखंडार्थं वाक्यत्वात् कुंडं पचेत्यादि वाक्यवत् इति

४ नाद्यः तदुक्तपदानां पर्यायतापत्तेः न द्वितीयः अन्वयानुपपत्तेर्लक्षणाबीजस्याभावात् ४

अद्वै.टी चेत् उच्यते अनुमानं तावत् प्रकृष्टप्रकाशश्चंद्र इत्यादिवाक्ये व्यभिचारि तथा हि

८७ अस्मिन् ज्योतिः समुदाये चंद्रशब्दार्थः क इति प्रश्नस्योत्तरमिदं वाक्यं प्रकृष्टरूपजातिविशेष

प्रकाशगुणाभ्यामुपलक्षितं चंद्रप्रातिपदिकार्थमात्रमुपस्थापयति विशिष्टप्रातिपदि

कार्थप्रतिपादने वक्तुरधिकवादित्वप्रसंगात् ननु साध्यस्य धर्मवैशिष्ट्यप्रतिपादने

स्माद्वाक्याच्छ्रोतुः संशयनिवृत्तिः कथं स्यात् अस्य वाक्यस्य कश्चन चंद्र इति वाक्यादवि

शेषादिति चेत् नैवं भ्रमेण लक्षणयोपस्थापितचंद्रव्यक्तौ इयं सा प्रकृष्टप्रकाशोपलक्षिता इप्रप्र

व्यक्तिर्यदि चंद्रप्रातिपदिकार्थो न स्यात् तर्हि तज्जिज्ञासुं प्रति भ्रमेण लक्षणया तत्र चं ८७

यादिति तद्विषय एव तस्यैव संशयनिवृत्तिरिति प्रकृष्टप्रकाशादिवाक्यमुभयत्र

कृ२ क्षण सद्भावाद् यत्नेवाखंडार्थकमिति भवति वाक्यत्वानुमानं तत्र व्यभिचारि किंच स

त्यादिवाक्यं अखंडार्थं लक्षणवाक्यत्वात् प्रकृष्टप्रकाशादिवाक्यवत् इति सत्प्रतिपक्ष १९

त्वादपि न दूषणं यद्यप्यत्र चंद्रत्वविशिष्टः प्रातिपदिकार्थ एव वाक्यार्थः स प्रकृते कः

अ श्चंद्र इत्यादिवाक्यार्थैकदेशं तेन युज्यते तथापि उक्त एवाखंडार्थलक्षणं रूपस्येह विद्यमानत्वाद् हेतुरिह वा

क्यस्याखंडार्थत्वे दूषणं तो न वत्सेय नर्थं च तथा सर्वाणि ज्योतींषि प्रपतंत्वं मद्य भ्रमेऽपि

वाक्यत्वान्न चतुर्भुजत्वं नेदं तीतिन प्रकृष्टप्रकाशादिवाक्यं व्यक्तिस्वरूपपरमिति वाच्यं

ज्ञातायामपि चंद्रव्यक्तौ अयं चंद्रो न वेति संशयदर्शनेन चंद्रव्यक्तिस्वरूपमात्रमिति वाच्यं

ज्ञातायामपि चंद्रव्यक्तौ अयं चंद्रो न वेति संशयनिवारण कल्पनानन्त्रचतुर्भुजोपपत्तेः।

ननु सत्यादिपदानामखंडार्थत्वे घटकलशादिपदवत् पर्यायता दोष उक्त इति चेत्

न दृष्टांतस्य विषमत्वात् तत्र हि पदानां वाच्यभेदो नास्ति सत्यादिपदानि तु भिन्नमेवा भिन्न३

र्थं वदंतीति महान् विशेषः तथा हि सत्यपदं बाधायोग्यत्वरूपानात्मविशिष्टचैतन्यम

भिधत्ते ज्ञानपदं च प्रमाणजन्यांतःकरणवृत्तिविशिष्टं एकपदं च संजातविशिष्टचैतन्य

तीयाभाव

समाहृतैव त्वमुक्तलक्षणाशक्यत्वापि सर्वत्वमवरूपव्यापकत्वविशिष्टं तदुपस्थितं वा चैतन्यमाहतुः
तत्र केवलं जगत्कारणोपाधौ उक्तलक्षणाप्रयोगः अहमिति प्रकारान्तरोपाधौ आत्म
शब्दप्रयोग इति विशेषः एवं च महेशशक्यत्वापि अंतःकरणविशिष्टं चैतन्यमाहुः अत्रा
पि संबोधस्य बोधकत्वरूपप्रयोगोपाधिभेदसत्वान्न पर्यायत्वं तदन्यदपि प्रकृतजग
त्कारणत्वादिविशिष्टं चैतन्यमाहात्तच्च समस्तादि पदानां जहदजहल्लक्षणः
असत्योतादिस्वरूपतात्पर्यैः गंगापदस्य शक्यातीरस्य गंगात्ववत् इति वाच्यं उक्तविध
या समस्तादिपदानां जडांशवाचकत्वे सिद्धे भागलक्षणया जडांशपरित्यागे नाजडे समस्तादि
स्वरूपचैतन्ये सैव वृत्त्यमाणत्वादिति नत्वेवामपि किंलक्षणीयानां विनापि योग्यत्वे
तस्मांशयोरन्यतरयोरन्वयो नविरुध्यति गोरनित्येत्यादौ गोपिंडानित्यत्वयोरिवेति चेत्
न दृष्टान्तासिद्धेः नत्रापि पदोपस्थापितानां भार्त्तानां वाक्यार्थान्वयानियमे नगो

त्वस्यापि अनित्यत्वेनान्वयप्राप्तौ गोशब्दार्थैकदेशलक्षणाभावे त्वयबोधस्तु द
यात् नहि पदानि वाक्यार्थान्वयिनमर्थं प्रतिपादयंति अन्यथार्थैकदेशेपि पदानां त
र्थतापातादिति दिक् ननु समस्तादिपदानां तद्रूपत्वेनाभिमतचैतन्यस्वरूपमेव वाच्यम
स्तु किं विशिष्टवाचकत्वकल्पनया नैवं वाच्यं एतावता वच्छेदकधर्मविशिष्टस्मैवाच्यतेति
स्वरूपस्य वाच्यत्वे अखंडार्थताहानिरिति वाच्यं स धर्मः किं वाच्योनुगतार्थः ऐवान्यो वानो
ऽयोग्यात्स्वरूपं वा नाद्यः द्वितीयस्य प्रकृतत्वेनानुगमानपेक्षणात् नहि
तीयः वाच्यतावच्छेदकधर्मकल्पनया स्वरूपस्य लक्षणत्वादिनोपेक्ष्यत्वतावच्छेदक
धर्मसौवीकारप्राप्तौ अखंडार्थत्वहानिप्रसंगात् अन्यथा रस्पैवाश्रयपर्यायत्वान्नेति चेत्
न समस्तादिपदानां अखंडस्वरूपवाचकत्वे घटकलशादिशब्दवत् पर्यायतापत्तेः एकस्मा
दपि पदात् सदादिसंशयनिवर्तकज्ञानप्रसंगाच्चासिद्धानेन समस्तादावेकैकपदलक्षित

४ धर्माश्रयत्वयोग्यस्वरूपविशेषणे वा वान्येभ्यो व्यावृत्तिबुध्युपपत्तौ कृतं व्यावर्तक ४

स्य यद्यपि सत्यज्ञानानंदाद्यात्मकत्वमस्ति तथापि एकपदप्रयोगे ऽपरसंशयोऽनेन नि
वर्त्तते सत्यपदजन्यसत्यात्मेतरज्ञानात् तत्संशयनिवृत्तावपि ज्ञानाद्यनेतरसंशयानिवृ
त्तेः नच सत्यज्ञानादिपदानां स्वरूपावाचकत्वपक्षे इदं युक्तं एकस्मिन्नर्थे पर्यायपदाद्
निमित्तकावरणनिवृत्त्यभावेनानेकपर्यायपदाद्यजन्यवृत्त्यनपेक्षणात् नहि घटाकारवृ
त्तौ सत्यां घटावरणनिवृत्त्यर्थं पुनः कलशाकारवृत्तिरपेक्ष्यते घटो द्रव्यमित्यादौ पर्या
यपदाद्वाच्ये च तस्मिन्नेकस्मिन्नपि घटे घटाकारवृत्त्या घटावरणे निवृत्तेपि द्रव्यशब्दवा
च्यत्वप्रयुक्तस्य घटो द्रव्यं नवेति संशयजनकस्यावरणस्य निवृत्त्यर्थं
द्रव्यपदप्रयोगजन्याद्रव्याकारवृत्तिरपेक्ष्यते अतः सत्यादिपदानां पर्यायत्वेनैक
स्मिन् वाक्ये वैयर्थ्यपरिहाराय वाच्यभेदो वक्तव्य इति नैवं सत्यज्ञानानंदात्मक
स्वरूपवाचकत्वमिति ननु लौकिकपदानां शक्तिसंबंधितया ज्ञाताद्धीपस्थापक
पि

१२

अ
त्वनियमात् शुद्धस्य च ब्रह्मणो संगत्वेनाविषयत्वे न च सत्यादिपदवाच्यसंबंधित्व
बोधकप्रमाणाभावात् कथं सत्यादिपदाद्ब्रह्मण्यानुपस्थितिरिति चेत् नभाग
त्यागलाक्षणिकपदस्य विशिष्टे संगतिग्रहणकाले स्वरूपस्थापितत्वं शतेन जानन्निय
मात् वाक्यप्रयोगसमनंतरं तात्पर्यानुपपत्तिप्रतिसंधानद्वारा यं लक्षणया स्वरूपं
शबोधोपपत्तेः वास्तवसंगाभावेपि काल्पनिकानात्मसंगस्य विद्यमानत्वात् स्वप्र
काशब्रह्मणो वाक्यानामसंबंधज्ञाने प्रमाणांतरानपेक्षणात् स्वं ब्रह्मस्वरूपस्य वाच्य
ताभावेप्यमिते तस्मान्मास्तेर प्रयोजकत्वात् इति दिक् यदुक्तं लक्षणाबीजाच
यानुपपत्तेरभावदिति तदपि न तात्पर्यानुपपत्तेरेव लक्षणाबीजत्वात् तस्याश्च सर्वत्रा
क्षणिकवाक्ये ऽव्यभिचारित्वात् कथं यं गोवर्द्धक्षीरा वायुर्वै क्षेपिष्ठा देवते त्यादिषु
शास्त्रस्थलौकिकवाक्येष्वन्वयानुपपत्तेरभावात् अस्ति च ब्रह्मस्वरूपतात्पर्यकसत्यादि
५ न च पदांतरवाच्यमेव पदांतरलक्ष्यमिति न स्वरूपं पदांतरागोचरं सत्यादिपदलक्ष्यमिति वाच्यं यतो वा ५
५ चो निवर्त्तंते इत्यादिश्रुतिबाधप्रसंगेन प्रमाणांतरागोचरे ब्रह्मस्वरूपे वाचकशब्दसंगतिग्रहासंभवाच्च ५

दोषः

अद्वै.सि. १० वाक्येन तदनुपपत्तिरिति दोषः तथा ब्रह्माभेदज्ञानस्यैकत्वमस्यादिवाक्यमपि एक
प्रातिपदिकार्थविशेषकत्वादखंडार्थं न चाभेदांशे नयविरोधः जन्यचैतन्येतरत्वानुप
पात् एकमेवेत्याद्यद्वैतश्रुत्युपोद्बलितत्वरूपसलिंगकभेदमिथ्यात्वानुमानसद्भावात्
मिथ्याभेदस्य च पारमार्थिकाभेदप्रतिपादकश्रुत्यप्रतिद्वंद्वित्वाच्च जीवो ब्रह्मैव तद्
विलक्षणत्वात् तद्विलक्षणत्वं च जीवस्य सत्यज्ञानानंदात्मकत्वं तच्च तत्पदार्थ
निरूपणावसरे साधितं तत्त्वमस्यादिवाक्यमखंडार्थं कार्यकारणभावानापन्नद्रव्यमात्र
निष्ठत्वे सति समानाधिकरणवाक्यत्वात् सोयमित्यादिवाक्यवत् वाक्यत्वादिमुखेन
हीनाहादिवाक्ये व्यभिचारः तत्परिहाराय समानाधिकरणेति वाक्ये समानाधिक स्य
रणत्वमत्र ~~एकविभक्तिकत्वं~~ एकविभक्त्यंतपदमात्रत्वं नीलोत्पलादिवाक्ये १०
व्यभिचारवारणाय द्रव्यमात्रनिष्ठत्वे सतीति घटद्रव्य इत्यादौ व्यभिचारवारणाय २२

कार्यकारणभावानापन्नेति परं तत्त्वमस्यादिवाक्ये केचित् जीवेश्वरयोः स्वामिसेवकभावं नि
यम्यनियंतृभावं वा वर्णयंति तदयुक्तं सर्ववेदांतेषु उपक्रमोपसंहारादिभिः ध्रुतैकरस ६२
तास्यैकत्वबाधप्रसंगात् मुमुक्षोस्तत्त्वंपदलक्षिताभेदेऽभेदग्राहकप्रमाणाभावरूपा
नुपपत्तिमाह उपपन्नेति उक्तात्मनः त्वंपदलक्षितस्यैतन्मस्य वर्णितात् तत्पदलक्ष्यादि
त्यर्थः संभावितप्रमाणमसंभूतघटद्वयनित्यत्वेत्यादिना तदयोग्यत्वादिति रूपादि
हीने भेदप्रतियोगिनि चक्षुरादेरसामर्थ्यादिति भावः भेदस्य मानसेन्द्रियकत्वादिति वा
ध्रौ वाह्येंद्रियस्य भेदाग्राहकत्वेपि अंतरिंद्रियस्य तद्ग्राहकत्वमस्त्विति मनोजभेदज्ञानक
रणं तदुपादानत्वात् यद्यदुपादानं तत्तत्करणं यथा घटस्य मृत् प्रमाणसहका
रित्वादपि न मनः प्रमाकरणं यथा चक्षुः संस्कारोऽलोकः ननु आलोकेन पश्यती ६
ति प्रतीत्यालोकोपि करणमस्त्विति चेत् न तथा सति तज्जन्यज्ञाने आलोकीयत्वा

स्य प्रा द्वि

अद्वै. टी दिज्ञानस्तु भेदप्रसंगः नचानुभूयते स्वीक्रियते वा किंच [illegible] सा धारण

९१ गेध्वादिविषयसद्भावाद्वतुनेत्रादीनां तद्ग्राहकत्वं मनसस्तु तदभावात् कथं श्रुत्

कुकरणत्वं आत्मासुखादिकं च तस्य विषय इति चेत् नात्मनः स्वप्रकाशत्वात् का

सुखादेर्विरसाक्षिभास्यत्वस्योक्तत्वात् अस्तु तर्हि जीववत्त्वेदृश एव मनसो सो धा

रणो विषय इति चेत् नत्राह परमात्मन इति मनोऽविषयत्वं च परमात्मनः य

न्मनसा न मनुत इति श्रुतेः निर्विशेषस्य स्वप्रकाशपरात्मनः मनोजन्यज्ञानवि

षयत्वानुपपन्नेश्चेति द्रष्टव्यं ननु परमात्मनो मनोऽविषयत्वेपि तद्भेदस्य कथं न प्रत्य

क्षत्वं स्यात् अतींद्रियेति तस्यैंद्रियजन्यज्ञानाविषयत्वादित्यर्थः ननु धर्मि ९१

प्रतियोगिनो रैंद्रियकत्वं नाभावस्यैंद्रियकत्वे प्रयोजकं घटे नैंद्रियकमनस्त्वा

भावस्य घटे मनस्त्वानास्ती प्रत्यक्षविषयत्वेन व्यभिचारित्वादिति चेत् न घटे म

ति २३

नस्त्वात्यंताभावस्यानुमेयत्वात् तथाहि घटो मनस्त्वात्यंताभाववान् मनःप्रति

योगिकान्योन्याभाववत्वात् पटवदिति अन्यथान्योन्याभावाप्रतिसंधानदशायामा

पि घटे मनस्त्वात्यंताभावप्रतीतिः स्यात् घटे मनः प्रतियोगिकान्योन्याभाववत्त्वं च वि

रुद्धधर्मवत्त्वलिंगकानुमानगम्यमिति सर्वमन्योन्याभावरूपभेदप्रति

योगित्वं तस्य दार्थस्यांगीकृत्य तस्य मनोऽगोचरत्वेन तद्भेदः प्रत्यक्षायोग्य इत्युक्तं

इदानीं तत्त्वंपदलक्ष्यार्थयोर्भेदात्यंताभावरूपभेदप्रतियोगिनोऽभेदस्य चैतन्

यमात्रस्य स्वप्रकाशत्वादपि न तदत्यंताभावरूपभेदग्रहः इत्याह चैतन्येति इदं

विशेषणं जीवब्रह्मणोर्भेदानुपलंभासंभवे हेतुः त्वंपदलक्षितचैतन्यस्य स्वरूपेण तत्प

दलक्षितब्रह्मचैतन्यस्याभेदेन नाम यदि कश्चिद्योग्यो धर्मविशेषः स्यात् तदा त

दनुपलंभात् भेदग्रहः प्रामाणिकः स्यात् नचैतदस्ति किंतु त्वंपदलक्षितचैतन्य

अद्वै.टी स्वरूपमेव न तस्य ब्रह्मणि तच्चैतन्याभेदः सर्वज्ञत्वप्रकाशेनानंदादिना भेदा
९२ नुभवे विद्यमाने भेदग्रहस्याप्रामाण्यं युक्तं संभवतीत्यर्थः ननु यदि स्वरूप ब्रह्म
भेदस्तर्हि पदस्य भासमाने तद्रूपानंदरूपताऽपि भासेत न च भासते तस्मात् तद्
भेदो न भासते इत्याशंक्य प्रकाशमानेऽप्यानंदाद्यंशस्य कथं ब्रह्मचैतन्येऽतज्ञानंदादि
निरूपितावरणसद्भावात् तदननुभवाभाव इत्याशयेनाह निरतिशयेति अविद्यावर
णं अविद्याकृतावरणं अननुभवसामर्थ्यं तस्यां आवरणरूपप्रतिबंध
कताभावेन दृष्टांतः तमसीति न च तमसि सिद्धो घटे चक्षुःसंयोगाभावेन भा ९२
नसामर्थ्यमेव नास्तीति वाच्यं तमःप्रावृतदूरप्रदेशादयमहितालोकवद्देशस्थि
तघटे चक्षुःसंयोगसद्भावेन तमसा प्रावृतेऽपि तस्यावरणकत्वादित्युक्तं न तद्भेदे इ
ति तस्य जीवब्रह्मणोर्भेदः अभेदस्यानुभवः तदनुभवसाधकः आनंदाननुभ २६

~अथवा जीवब्रह्मभेदसाधकः आनंदाननुभवो न भवतीत्यर्थः~

वो न भवतीत्यर्थः यद्यपि ज्ञानानंदयोः स्वतंत्रमभेद एव तथाऽप्युक्तरीत्याऽऽनं
दादिपदवाच्यताप्रयुक्तावरणसद्भावात् प्रकाशमानेऽपि चैतन्ये आनंदाभानमयुक्त
मिति भावः ननु कथमयं भेदः अभेदप्रतियोगिकः घटात्पटो भिन्न इति घटप्रति
योगित्वस्यैवानुभवात् न भूतले घट इत्येवं समानाधिकरणस्य घटस्याभेदप्रतियोगि
त्वासंभवात् अन्योन्याभावस्याधिकरणे प्रतियोग्युत्सारकत्वाभावात् अन्योन्या
भावसिद्धेः पूर्वं संसर्गाभावस्यायं नियम इति वक्तुमनुचितत्वात् विशेषणत्वात् गो
त्वाच्च न च भूतले घटो नास्ति भूतलं घटो नेति च प्रतीत्योर्वैलक्षण्यादन्योन्याभावा
दिलक्षणोऽन्योन्याभावः सिध्यतीति वाच्यं किमियं भूतलं घटो नेति प्रतीतिः भूत १०३
लनञर्थयोः समानाधिकरण्येन तयोरभेदविषयतया अस्तं तावद्भवप्रतीतिर्वै
लक्षण्यं किं वा उभयोः प्रतीत्योः नञर्थवैलक्षण्यादिलक्षणाबाधः भूतलघ

विशे

अद्वै.टी ऽभावयोर्भेदस्याबाधितत्वादनंगीकाराच्च नान्य: प्रतीतिविरोधे हेत्वन्तर्यां ग्रोक्तौ वा प्रतीते:
१३ ऽन्याभावत्वमात्रस्यैवेनान्यदात् प्रतीयमानत्वादिति नात्यंताभावविलक्षणोन्योन्या
भावासिद्धौ प्रतीतिविलक्षणं प्रमाणं नान्योन्याभावस्याधिकरणमपि निरूपयि
तुं शक्यते वस्तुमात्रस्याधारत्वे प्रतियोगिनोप्याधारत्वप्रसंग: ननु सर्ववस्तु स्वस्मा
दपि भिन्नं स्यात् प्रतियोग्यतिरिक्तस्याधारत्वेऽन्योन्याश्रय: प्रतियोग्यतिरिक्तपदस्य
प्रतियोग्यन्योन्याभाववद्वाचकत्वात् किंच अन्योन्याभावत्वमपि दुर्निरूपं तथाहि नम
अयमस्माद्भिन्न इति धर्मिप्रतियोगिज्ञानपूर्वकमेव भेदोऽवगम्यते इति तत्र ज्ञानं भेद
ज्ञानकारणं न वापि धर्मित्वेन प्रतियोगित्वेन तयोर्ज्ञानकारणमिति वक्तव्यं १३
अन्यथा इदं ज्ञानयोरपि स्वरूपेणोपस्थितयोर्वस्तुनो धर्मिप्रतियोगि
नोर्भेदग्रहसंभवेन तद्भेदभ्रमासंभवात् भेदभ्रममात्रोच्छेदापत्ते: धर्मित्वप्र २५

तियोगित्वयो: विरुद्धधर्मयोर्ज्ञानं च तदाश्रययोर्भेदज्ञानं विना न भवतीत्यन्योन्या
श्रय: किंच धर्मित्वप्रतियोगित्वयो: भेदस्य धर्मो भेदस्य प्रतियोगीत्येवमाकारेणान्ये
दनिरूप्यत्वादन्योन्याश्रय: अपि च घटो भिन्न इति घटे भेद इति वा विशेषणविशे
ष्यभावेनैव भेदोऽवभासते न च ज्ञानं च भेदावभासाधीनमिति पुनर्भेदभेदिनोर्विशेष
णविशेष्ययोर्भेदान्तरं वक्तव्यं इत्यनवस्था स्यादिति विद्भिर्मत भेदस्वरूपं तदाधा
रस्य च तत् ज्ञानानामनिरूपणादशक्यनिर्वचनत्वात् संसर्गाभावादिरिक्तो घटपटा
दि प्रतियोगिकोऽन्योन्याभाव इति ननु घट: पटो नेति प्रतीयमानस्वात् इदमिमता
भेदात्यंताभावरूपभेदस्य घटपटाभेद एव प्रतियोगि वक्तव्य: स च न युक्त: अन्य
तात्मत्वादिति चेन्न अस्ति हि: घटपटौ भेदो हि घटपटस्वरूपाभेद: स चाविद्यान
चैतन्यात्मको ब्रह्मनिरूप्यो विद्वद्भि: प्रत्यक्षेणानन्यैरपि शास्त्रसंस्कृतमतिभिर्युक्त्या

अद्वै॰टी
२४

वसीयते इति कथमसत्त्वमभेदस्य किं च भूतलं घटो न घटो पटो न इति भेदप्रतीति
रपि भूतलं घट इति यत् तन्नेत्युपर्युक्तिः स्वलीः अभेदप्रतीयोगित्वमेव समर्पयति घट
पटयोरन्योन्याभाव इति शब्दोपि तदुभयाभेदस्याभावप्रतीयोगित्वं प्रतिपादयति
अन्योन्याश्रयस्यान्योन्यात्मकत्वरूपाधर्मादुर्धान्तरानिरूपणात् न च धर्मिप्रतियोगि
नोः स्वरूपाभेदस्य सर्वदाविद्यमानत्वात् तदत्यंताभावप्रमानसंभवतीति वाच्यं इल
पर्नेः इत्ययत्नादिलिंगेन तस्य मिथ्यात्वात् नन्वयं भेद एकोऽनेको वा नाद्यः घटपटयो २४
र्भेदित्वं भयोर्भेदद्वयाविरूपेण नानाभावेन प्रतीयमानत्वात् नांत्यः स्वरूपाभेदस्या
खंडचिद्रूपस्यैकत्वेन तत्प्रतियोगिकनानाभावासंभवादिति चेत् उच्यते एकस्य
एवायं एकाभेदप्रतियोगिको भेदः सकलपदार्थनिष्ठः अस्यादि शानसत्वादि व
(दुपाधिभेदाद्भेदनानेप्यदोषः ननु यदि घटपटभेदप्रतियोगिको घटपटादिसर्वध

टी गि २६

र्मिक एवायं भेदः तर्हि घटात् पटो भिन्न इति घटप्रतियोगिकत्वं एकधर्मिकत्वं च कथम
उ॰ नुभूयते इति चेत् उच्यते भवन्मते घटपटेतरयद्धर्मिकस्य पृथक्त्वस्य घटात् पटः
पृथक् पटाद्घटः पृथक् इति चैकधर्मित्वं यथानुभूयते तथा भेदस्याप्येकधर्मिकत्वं
प्रतीतौ किं बाधकं अभेदात्यंताभावातिरिक्तभेदस्योक्तयुक्त्या निरूपयितुमशक्यत्वा
दभेदात्यंताभाव एवावच्छिन्नत्वेन प्रतीयत इति न घटादेरवच्छिन्नत्वानानुरोधेनापि
तत्प्रतियोगिकान्योन्याभावसिद्धिः न चावच्छिन्नत्वमेव प्रतियोगित्वमिति वाच्यं तथा स अबाधित
ति भेदस्य वर्णितप्रमाणिकाभेदप्रतियोगिकत्वबाधप्रसंगात् अप्रामाणिकान्योन्या
भावकल्पनागौरवप्रसंगाच्चेत्यलं जीवब्रह्मभेदेऽनुमानमात्रं निराकरोति नसी
त्निर्विशेषे इति हेतुगर्भविशेषणं विशेषवति पदार्थे हि किंचिद्विशेषरूपेणालिंगे
न कश्चिद्विशेषः साध्यते न च निर्विशेषे [illegible] संभवतीत्यर्थः ननु सर्व
ज्ञत्वकिंचिज्ज्ञत्वादेः विरुद्धधर्मस्य भेदानुमापकस्य विद्यमानत्वात् निर्विशेषत्व

त्रि

अधि. टी ९५ मसिद्धमित्याशंक्याह सर्वज्ञत्वेति सर्वपदस्यजीवपरत्वोस्तात्विकत्वे देशकृतिं प्रमाणयति
द्वासुपर्णेति द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं
भेउ स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति अस्यां श्रुतौ जीवेश्वरौ जीवात्मनोः भेदः आपाततो
भातीत्यपि तथापि श्रुत्यंतरेणांतःकरणजीवयोर्भेदपरत्वेनैतस्या व्याख्यात
त्वान्नजीवब्रह्मभेदसाधिकेयं श्रुतिरित्याह तयोरन्य इति तयोरन्य इतिपादे
नयुक्तं तत्सत्वमेवोक्तं अनश्नन्नन्यो अभिचाकशीतीति प्रतीकग्रहणं अनश्नन्
अन्नन्यो अभिपश्यति ज्ञ इति व्याख्यातं ज्ञः निःसत्वं हंसाख्यं तद्रूप इति याव
त् ननु पैंगिरहस्यब्राह्मणवाक्येपि सत्वपदस्य सत्वप्रधानांतःकरणवाचित्व
जीवपरत्वमस्तु ज्ञ इति पदस्य चिद्रूपपरमात्मपरत्वमस्तु इति चेत् न उक्तरीत्या ९५
कल्पितावेतौ सत्वक्षेत्रज्ञावित्यंतःकरणजीवोभयपरत्वेन विवृतत्वात् न च स
त्वस्यैव ज्ञावित्यत्रापि जीवपरावेवोक्तावितिशंकनीयं तदेतत्सत्वं येन स्वप्नं २७

पश्यति यो यं शारीर उपद्रष्टा स क्षेत्रज्ञ इत्यंतःकरणजीवपरत्वेन पुनर्विवरणा
त् किंवा स्यवाक्यस्य जीवपरत्वे रेतासंघात संभवति प्रत्यक्षासिद्धेकृते रेता लघ्वीत अ
पिच अस्य वाक्यस्य भेदपरत्वमिष्टतापि परात्मनो जोकृत्वे अभ्युतोन वगतेना
स्वयं वक्तव्यं तथात्वे भयपरत्विनवाक्यार्थे भेदप्रसंगः कुत्र नहि एतस्य वाक्यस्य
तात्पर्यं उच्यते स्यादनीति देहाभिमानिनः कर्मफलभोक्तृत्वं प्रसक्षामिति तमनूद्य
तस्यैव देहाद्यभिमानाभावकोलेभ्यतो न वगतं अभोक्तृत्वं ज्ञापयतीति जीवपरत्व ६
भेदे एवास्य तात्पर्यमित्युक्तं श्रुत्यं तर पर्यालोचनया पिने ईवाक्यं भेदपरमित्या
उ२ ह उदरमिति उतु अपि अरं पश्यं अंतरं भेदं पश्यमप्यिथोजीवेश्वरयोर्भेदं
न्य पश्यतेसंसारी भवतीति निषेधश्रुतेः अतो तर्यामिणः परमेश्वरादन्यः पर

अर्हि दी ९६

मार्थतोऽभिन्नो ब्रह्मदर्शनाश्रयः प्रमाता नास्तीति निषेधस्मृतेरर्थः नेदमात्रस्यमि

ध्या [illegible]हापि श्रुतिप्रतिपाद्यत्वं न संभवति किं पुनर्जीवपरत्वे इदमेत्यभिप्रेत्याह नेदमा

त्रस्येति कल्पितत्वादित्यनेन संबंधः तत्र हेतुद्वयमाह मायांविनेति उपक्रमोपसंहा

द्य राद्यवधृततात्पर्यका हि तत्त्वमस्यादयो नातिह्नेन ब्रह्मणि ज्ञानसमान हि तद्वर्गस्य सर्पादिवत् ३३

मायाकार्यत्वात् तन्निवर्त्यत्वेनेदस्यापि तथात्वात् प्रपंचाभावात् हेस्य कल्पितत्वमित्य

र्थः ननु केयं माया ननु क्रमेण विशेषरात्रिकप्रश्नाविषयत्वसेति निरूपयतीयं तदि ये

त्यविद्या किंलक्षणा किंप्रमाणा किमाश्रया किंविषया चेति विद्यायाः अभावएव वा

विद्येति चेत् तस्या [illegible]कारादिभावप्रपंचोपादानत्वायोगात् अतएव भ्रांतिज्ञानं संशयज्ञानं

वा अविद्येति परास्तं भ्रांत्या हेरज्ञानोपादानकत्वाच्च अनादिभावरूपत्वे सति ज्ञाननि ९६

वर्त्यत्वेनेति चेत् तत्र ज्ञाननिवर्त्यत्वे सेनावबुद्धेऽनंतरज्ञाननिवर्त्ये पूर्वज्ञानादौ अ २६

र्या सु

तिव्याप्तिः न च ज्ञानत्वेन निवर्त्यत्वविवक्षया अतिव्याप्तिरिति वाच्यं तथापि विद्याया आ

त्मरूपा हि मुक्त इति श्रुतिबलात् ज्ञानत्वेन ज्ञाननिवर्त्यत्वेनाभावरूपप्रपंचे अतिव्याप्ति

~~[illegible]~~ अतिव्याप्तिः

स्यादेवेति अनादीति विशेषणं तथापि इदं ध्वंसप्रागभावे अतिव्याप्तिः स्यात् अनादि

यदि च प्रागभावः तन्निवृत्तिरूपायाभिद्वा तस्याज्ञानसेन ज्ञाननिवर्त्यत्वेन प्रागभावस्य जन्यत्वे

अनादेर्ज्ञाननिवर्त्यत्वात् तत्कारणाभावरूपेति चेत् न अविद्यासंबंधादावतिव्या

प्तेः नाप्यस्यां प्रमाणमस्ति न जानामीति प्रत्यक्षस्यैश्वर्यवाघाभिमतज्ञानाभावविष

स्व ३ यकत्वात् [illegible] अविद्यां विनानुपपत्त्या वा

च नार्थापत्तिरपि तत्र प्रमाणं नाप्याश्रयो [illegible] निरूपयितुं शक्यः प्रकाशरूपस्य वि

दात्मनः अंधकारादिरूपाविद्याश्रयत्वायोगात् न हि प्रकाशरूपे सवितरि अंधका

प्र

३ घटवदित्यनुमानस्य प्रधानादिना सिद्धसाधनात् तत्रा ३

नंका ३ २ वेदक अश्रुतार्थापत्तिविद्याप्रमाणत्वायोगात् ३

अद्वै. टी ८

त्वाश्रयत्वं दृष्टं न चाहमज्ञ इति प्रतीतेरहंकार एव तदाश्रयः अज्ञानकार्यस्य तस्य स्वाद्भावि
नोऽहंकारस्याज्ञानाश्रयत्वायोगात् अहमज्ञ इति प्रतीतेश्चैतन्ये कल्पितयोः अज्ञाना
हंकारयोः स्फटिकाचले प्रतिबिंबितयोर्लौहित्यसुखयोर्लौहित्यं सुखमिति भान
वदाश्रयाश्रयिभावेन भानोपपत्तेः अविद्यायाः विषयोपि दुर्निरूपः स्वप्रकाश
चैतन्यस्य तद्विषयत्वायोगात् नहि प्रकाशमाने सवित्रादावंधकारविषयत्वं दृष्टं ना ५८
श्यनाशकयोर्विषयविषयिभावासंभवाच्च अन्यथा कदापि तस्य निवृत्तिर्न स्यात्
नापि त्वं न जानामीति प्रतीत्या इदमेव विषयः जडोपादानीभूतायास्तस्याः स्वका
र्यविषयत्वानुपपत्तेः सविषयकेच्छादेः स्वकार्यविषयत्वादर्शनाच्च अज्ञानस्या
श्रयविषयस्वापेक्षत्वस्वाभाव्यं च सर्वजनसिद्धमिति सर्वथा दुर्निरूपेयमविद्ये ९
ति चेन्न अनाद्युपादानत्वे सति ज्ञाननिवर्त्यत्वस्यैवाज्ञानलक्षणत्वात् अविद्या
संबंधादीनां चानुपादानत्वात् चैतन्यस्योपादानत्वेपि ज्ञानानिवर्त्यत्वात् नातिव्याप्तिः १०

विनानुपपत्त्याभावाच्च नार्थापत्तिरपि तत्र प्रमाणं नाप्याश्रयो निरूपयितुं श
क्यः प्रकाशरूपस्य चिदात्मनः अप्रकाशरूपाविद्याश्रयत्वायोगात् नहि प्रकाश
रूपे सवितरि अंधकाराश्रयत्वं दृष्टं न चाहमज्ञ इति प्रतीतेरहंकार एव तदाश्रयः
अज्ञानकार्यस्य तस्य स्वाद्भाविनोऽहंकारस्याज्ञानाश्रयत्वायोगात् अहमज्ञ इति
प्रतीतिश्चैतन्ये कल्पितयोः अज्ञानाहंकारयोः स्फटिकाचले प्रतिबिंबितयोर्लौहि
त्यसुखयोर्लौहित्यं सुखमिति भानवदाश्रयाश्रयिभावेन भानोपपत्तेः अविद्यायाः
विषयोपि दुर्निरूपः स्वप्रकाशचैतन्यस्य तद्विषयत्वायोगात् नहि प्रकाशमान
सवित्रादावंधकारविषयत्वं दृष्टं नाश्यनाशकयोर्विषयविषयिभावासंभ
नि९ वाच्च अन्यथा कदापि न तस्य निवृत्तिर्न स्यात् नापि त्वं न जानामीति प्रतीत्या इदं
तु मेव विषयः जडोपादानीभूतायास्तस्याः स्वकार्यविषयत्वानुपपत्तेः सविषयकेच्छा

अद्वै. टी
१८ दृश्यकार्यविवर्त्तविषयमविद्येति मैवं अनाद्युपादानचेतितानानिवर्त्यत्वात् अतिव्या
प्तेः कार्यतादात्म्यवत् कारणस्वरूपोपादानत्वस्यात्मन्यपि सत्त्वात् नचानुसादितप्र
मे घटाद्यज्ञानेऽव्याप्तिरिति वाच्यं तत्राप्युपादानयोग्यतायाः सत्त्वात् तत्र [illegible] अनुभवादि
अथ वासकलजडोपादानीभूताज्ञानमेकमेव तदेव घटादिकार्येऽनुस्यूतं तत्तदवच्छिन्न
चैतन्ये पृथक् पृथगावरणजनकं चेति घटं न जानामीत्यादिरूपेणानुभूयते घटादि
ज्ञानेन मूलाज्ञानजनावरणनिवृत्त्या चाज्ञानं निवृत्तमिति व्यवहारः तत्र अज्ञान
निवृत्त्या न चाज्ञानस्यानस्यानादिभावरूपत्वे आत्मवन्निवृत्त्यसंभव इति वाच्यं १९
अनादिप्रागभावस्येव निवर्त्तकसमवधानेऽनादिभावस्यापि निवृत्तेर्बाधका
भावात् निवर्त्तकं चाज्ञानस्यान्वयव्यतिरेकसिद्धं ज्ञानमेव नच तत्र प्रमाणाभा
वः अहमज्ञो मां अहं न जानामीति प्रत्यक्षस्यैव तत्र मानत्वात् नच ज्ञानाभावस २०

२ नेघटे आनुमानवृत्त्यादिसद्भावेन घटो न प्रकाशत इति व्यवहाराभाववत् स्वयंप्रकाशमा २

वास्यविषय इत्युक्तमिति वाच्यं किमात्मस्वरूपज्ञानाभावोऽस्य विषय आत्मविष
यकवृत्तिरूपज्ञानाभावो वा नाद्यः असंभवात् न द्वितीयः प्रत्यक्षेण प्रकाशमा ×
नापरोक्षचिद्रूपे आत्मनि वृत्त्यभावमात्रेण न प्रकाशत इति व्यवहारासंभवात्
नवा द्वितीये वस्तुनि पारमार्थिको ज्ञानाभावः संभवति अपारमार्थिकस्य वत
स्याज्ञानं विना न संभव इति भावरूपाज्ञानसिद्धं अपि च शुक्तिरूप्यज्ञानकार्य
त्वादज्ञानमेवेति तदभावः कथमज्ञानं स्यात् नहि घटाभावो घटो भवति न्यूनत्वेन
जानामीत्यत्र चवस्य मिथ्याज्ञानं संशयो वा विषय इति वाच्यं तयोरज्ञानोपादान
कत्वेनाज्ञानत्वायोगादित्युक्तं इदं रजतं न भवतीत्यादिवाक्यात् मिथ्याज्ञानेनिवृ
त्तेपि तर्हि किमिदमिति जिज्ञासादर्शनेनाज्ञानानुवृत्तेर्मिथ्याज्ञानस्याज्ञानाद्भिन्नत्वा
त् किंच मिथ्याज्ञाने रजतं जानामीति ज्ञानत्वानुभवेन न तस्याज्ञानत्वमेव किंच
ज्ञाना

द्वै

अद्वै० टी यन्निरूपज्ञानाभावएव अज्ञानमितिपक्षे सकिंअत्यंताभावः ध्वंसः प्रागभावोवा

९९ नाद्यः घटादिज्ञानसमवायिप्रदेशे तदत्यंताभावाभावात् नापिध्वंसः रूपादिविशे-

षप्रतीतिदशायामेव ध्वंसप्रतीतेः तस्यानुमेयत्वेन न जानामीत्यपरोक्षज्ञानविषं

यत्वानुपपत्तेः पूर्वंयद्विषयकं ज्ञानं नोत्पन्नं तत्रापि न जानामीति प्रतीति दर्शनेन न

ज्ञानध्वंसस्तद्विषयः नापि प्रागभावः तस्यापि ध्वंसवदधिकरणावस्थाविशेषप्र

वानुमीयमानत्वेनातीन्द्रियत्वान्न जानामीत्यपरोक्षज्ञानविषयत्वानुपपत्तेः

यद्विषयकं ज्ञानं कदापि नोत्पत्स्यते तत्रापि न जानामीति प्रत्ययसत्वाच्च अ

त्यंताभावध्वंसप्रागभावानां क्रमेण नास्ति ध्वस्तो भविष्यतीति निश्चितविल ९९

क्षणप्रतीतिविषयत्वेन ध्वंसप्रागभावयोर्न जानामीति प्रत्ययविषयत्वायो

गाच्च प्रमाणाभावेन बाधकसद्भावेन च प्रागभावस्यैवाभावाच्च न च भविष्य ३१

तीति बुद्धिस्तत्र प्रमाणमिति वाच्यं अवस्थाविशेषावच्छिन्नोपादानेन वा अधिकर

णो समयविशेषैः संबंधवत्त्वात्यंताभावेन वा तदुपपत्तेः ननु घटोऽग्निसंयोगोत्त

रक्षणे रूपरसादयो जायंते तेषां चोपादानादिसामग्र्या एकत्वेन कार्यवैचित्र्याभावे यो

गात्तन्निर्वाहार्थं तत्र प्रागभावभेदकृतसामग्रीभेदो वक्तव्य इति चेन्न रूपा

दीनामेकक्षणोत्पत्तौ प्रमाणाभावात् भावे वा तत्तत्पूर्वरूपादिध्वंसादेवोत्तरोत्त

ररूपाद्युत्पत्तेः सामग्रीभेदस्य स्पष्टत्वात् न च प्रागभावास्वीकारे उत्पन्नस्य घ

टादेः पुनरुत्पत्तिप्रसंगः प्रागभावातिरिक्तसामग्र्याः सत्वादिति चेन्न उत्पत्ति

र्हि कारणे कार्यस्य समवायः कार्यसत्तासमवायो वा तदुभयमप्युत्तरकाले वि

द्यत एवेति किमत्रापि कमापादनीयं यदपि कारणत्वं नियतप्राक्कालवर्त्तित्वं

प्राक्कालत्वं च प्रागभावावच्छिन्नकालत्वं इति कारणत्वलक्षणस्यानुपपत्तिरेवा

साध्यते पुनर्दुःखेषु देहेंद्रियादिषु सत्स्वपि प्रयत्नेन सिद्धा दुःखप्रागभावासहवृत्तिदुःखध्वंसरूपामु

अहे.टी प्रागभावे मानमिति तत्रापि न एवं सति तव मते प्रागभावकालयोरकारणत्व प्र
१०० संगात् प्रागभावकालयोः प्रागभावावच्छिन्नकालाधिकरणकत्वाभावात् तथा
च सतित्व वृत्तित्वापातात् अस्ति च प्रागभावस्वीकारे बाधकं तथाहि मुमुक्षोः दुः श्रो:
खप्रागभावाभाममियत्ता वर्त्तते न वा वर्त्तते चेत्तर्हि ज्ञानं विनापि प्रतियोगि न स्यु
क्तिः स्यात् दुःखप्रागभावरूपदुःखकारणाभावात् ननु दुःखप्रागभा
वानां तावत्त्वेपि मुक्तौ विलंबसहमानो ज्ञानमुत्पादयति लंबेन तां नाशयत्वी
ति चेत् न ज्ञानस्य दुःखप्रागभावनिवर्त्तकत्वे दुःखजनकत्वापत्तेः दुःखप्रागभा १००
वनिवृत्तेर्दुःखानतिरिक्तत्वात् प्रागभावस्य स्वाधिकरणे प्रतियोगिजनकत्वनि
यमेन तस्मात्प्रतीनाशासंभवाच्च अन्यथा यदि स्वाधिकरणे प्रतियोगिनं न ज
नयेत्तर्हि सोऽनंताभाव एव स्यादिति ज्ञानस्य दुःखप्रागभावनाशेऽनुपयोगात् ३२

*च इयत्तारहितत्वे च तेषां प्रतियोगिनं जनयतामपि न समाप्तिसंभवः अन्यथा
इयत्ताराहित्यव्याघातात् इति प्रागभावस्वीकारे सर्वथा मोक्षानुपपत्तिरित्यर्थः स्या
त् किंच कृतमहापातकप्रायश्चित्तस्य पुंसः स्वसमानाधिकरणदुःखोत्पादनौवि
नाशयितुमुपात्तमहापातकजन्यदुःखप्रागभावस्यात्मनि जननोन्मुखत्वं ज्ञानेन प्र
वृत्तिर्न स्यात् ससंसाधनत्वात्स्वात्मनि निश्चितमहापातकजन्यदुःखप्रागभावा
भावप्रतियोगिजननार्थं दुःखप्रागभावसद्भावे महापातकमेवाग्रे संपादयेत्
वेनेत्यपादनाय्यत इतिवदुःखोत्पत्त्युन्मुखं प्रागभाव इति न ज्ञानप्रागभावो ज्ञानं किं
च अहमज्ञ इति प्रतीतो ज्ञानाभावः [illegible] ज्ञानसामान्यस्य विरोधिपदार्थेन ज्ञ
[illegible]भाति न चैतत्स्वर्गे ज्ञानाभावः तर्हि ज्ञानसामान्याभावस्यैव वक्तव्यः
ज्ञानविशेषाभाव ~~[illegible]~~ ज्ञानांतरविरोधित्वेन तत्सामा
स्य

[illegible] ऽप्यविरोधित्वात् तथाच अहमज्ञ इत्यात्मनि अज्ञानानुभवकाले धर्मिण आत्मनः प्र
१०२ तियोगिनो ज्ञानसामान्यस्य च ज्ञानसद्भाववत्त्वे नाभावेन ज्ञानसामान्याभावप्रमासंभव
ति धर्म्यादिज्ञानस्य स्वप्रकाशत्वेन ज्ञानसामान्याभावभ्रमोऽपि न संभवति तर्हि सिद्धांति
मतेऽपि कथं ज्ञानसद्भावे ज्ञानसामान्यविरोधिभावरूपाज्ञानसद्भाव इति चेत् उच्यते
ज्ञानसामान्यं नाम साक्षि तत्साक्षिरूपमात्माभिन्नं चैतन्यमेव तच्चाज्ञानपदवाच्यास्मत्क
त्वामुल्लसत्सु त्रिषु अनुस्यूतत्वात् गोव्यक्तिषु गोत्ववत् सामान्यमित्युच्यते तस्य चास्य
[illegible] द्विभिन्नभावरूपाज्ञानं वह्नेरिव मण्यादि प्रतिबंधकत्वात् विरोधीत्युच्यते इति
तत्सद्भावेन विरुध्यते नहि प्रतिबंधकमणिसद्भावे वह्न्यभावो नियतः स्वप्ना १०२
कालेऽपि तस्मिन् अज्ञानकृतप्रतिबंधो यथोपपादयिष्यते इति अहमज्ञ इति
प्रतीतेर्न ज्ञानसामान्याभावो विषयः अनुमानं च सर्गाद्यकालीनं कार्यज्ञानो ३३

पादानं कार्यत्वात् घटवदिति अत्र सर्गाद्यकालीनेति विशेषणेनोपादानस्याऽऽ
नादित्वसिद्धिः ज्ञातृत्वेन चैकत्वात् परमाणुकुंभकारादिसिद्धिः नच प्रधानेनान्यथा
सिद्धिः अनादिभावत्वं ज्ञाननिवर्त्त्यत्वम् शुक्तिरजतवत् इत्यनुमाने
न आत्मनि वृत्तिलेशविनत्वात् अनादिभावरूपस्य जगदुपादानस्य ज्ञाननिवर्त्त्यत्वसि
द्धेर्न प्रधानवैलक्षण्यसिद्धेः मायया धन्यदिवानीदारेण प्रावृता अज्ञानेना
वृतं ज्ञानं ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः इत्यादिस्मृतिसिद्ध तयोरप्यनुमाने यद्यपि
साक्षिभास्यमिथ्याभूतेऽस्मिन्नज्ञाने तत्त्वावेदकश्रुतिर्न मानं तथापि व्यावहारिकविवादास्पदं यद
ज्ञानस्य भावत्वं तत्र श्रुतेर्व्यावहारिकं प्रामाण्यमाहुः अहंकाराध्यासानुपपत्त्या चात्म
न्यज्ञानसिद्धिः असंगादिस्वभावे आत्मनि तेन विना अहंकाराध्यासानुपपत्तेः न वा
श्रौतोऽप्ययमनुपपन्नः अज्ञानमावृतत्वमयं आवरकत्वात् आवरकघटादिवदिति

अद्वै. टी.
१०२

तदावरकं धकारत्वादित्यनुमानेनाध्रियमाणब्रह्मण एवाश्रयत्वोपपत्तेः यदुक्तं प्रकाश
स्याप्रकाशाश्रयत्वं विरुद्धमिति तदपि न यथा प्रकाशाप्रकाशयोरन्योन्यसामानाधिकरण्या
भावेपि वृत्त्यज्ञानयोः सामानाधिकरण्यं दृष्टं बलात्स्वीक्रियते तद्वच्चिदात्मनो
ऽज्ञानाश्रयत्वमहमज्ञ इति प्रतीत्यनुरोधेन कल्प्यते नापि विषयोऽस्य दुर्निरू ज्ञान
पः चिदात्मन एव तद्विषयत्वात् ननु कथं प्रकाशस्याप्रकाशविषयत्वं अन्यत्रादृष्टं ना
श्यनाशकयोर्विषयविषयिभावे तदनुपपत्तिश्चेति चेन्न सत्यं प्रकाशाविरोधिप्र
काशोऽप्रकाशनाशकत्वादप्रकाशाविषयो न भवति यथाऽप्रतिबद्धो वह्निर्दहतीति न प्र
तिबद्ध इति दृश्यते बाह्यालोकस्य बाह्यालोकदूषितनयनं पुरुषं प्रति तिमिरांधका १०२
रविषये दृष्टादौ तदनाशकत्वम् प्रतिबद्धत्वादितिनथा स्वप्रकाशचिद्रूपस्य साक्षिणः
अप्रकाशाविरोधिनो अज्ञानविषयत्वं तदनाशकत्वं च न विरुध्यते अज्ञानावि ३६

रोधित्वं च चैतन्यस्यानाद्यज्ञानकृतावरणप्रतिबद्धत्वेन सम्यनिश्चयरूपवृत्त्यभावात् अ
निश्चयरूपाप्रातदर्शनादेरज्ञानाविरोधदर्शनात् न चैवमन्योन्याश्रयः अज्ञानकृता
वरणप्रतिबंधे सत्यविरोधित्वं तस्मिन् सति तदिति वाच्यं अज्ञानकृतावरणप्रतिबंधाविरोधि
त्वयोरनादित्वात् प्रतिबंधरूपावरणं च अस्ति प्रकाशत इति व्यवहारयोग्ये ब्रह्मणि
नास्ति न प्रकाशत इति विपरीतव्यवहारं अस्ति प्रकाशत इति व्यवहारायोग्यत्वं वा योग्यत्वं ५
न तु कुड्यादिना दीपादेरिव ब्रह्मण आच्छादनं व्यापके तदयोगात् नन्वेवं ब्रह्मणः
आवृतत्वे न दृश्यत्वे जीवचैतन्येपि तदावरणं स्यादिति जगदांध्यप्रसंगः जगद्धा
सकचैतन्यस्याहेतुत्वादिति चेत् उच्यते निरंशोपि ब्रह्मणि चैतन्यानंदादीनां कार्य
नियंताहसत्यविरुद्धमानोचाद्वैतमांशोनाहनतदसाद्भुः श्रीगुरवस्तु यद्यो करस्य
ब्रह्मतत्प्रतिपादितानन्दात्मोपडितं सत्तत्तद्ब्रह्मज्ञानादिपदवाच्यावाच्यक स्ते
२१

घटस्वरूपावरणं

अ॰ टी॰ होपाधिकस्य ब्रह्मस्वरूपानानंदादिरूपस्य ... व्यवहारोपि नित्य एव व्यवहारस्ने
०३ दप्रयुक्ता ह्यावरणभेदाः कल्प्यंते यथैकस्मिन् घटे मृदादिरूपव्यवहारसद्भावेपि घटोस्तीति सं
शयदर्शनात् घटस्वरूपावरणं द्वितीयं न वेत्यादि संशयदर्शनात् घटस्वरूपावरणं च कल्प्यते ल्प्यते
तथा च व्यवहारभेदप्रयुक्तव्यवहारभेदवति ब्रह्मण्यपि चैतन्यं ब्रह्मानंदो वा ऽपानंदो वे
त्यादिसंशयदर्शनात् ब्रह्मज्ञानानंदादिरूपेपि भिन्न एव व्यवहारभेदप्रयुक्ता ह्यावर
रणभेदाः कल्प्यंते यथैकेनैव तत्तत्स्वरूपावरणं कल्प्यते चित्प्रकाशोस्ति न वेति सं
शयादर्शनेन चैतन्ये आवरणं नास्तीति चेत् तन्मन्दस्यानुभूतमित्युच्यते इति चित्प्रकाशपंउग २०३
रूपमेव कूटस्थं स्यादित्याहुः न च ब्रह्माश्रयब्रह्मविषयकाज्ञानस्य घटमहं न जानामी श्र॰२
ति घटविषयकत्वेन जीवाश्रयकत्वेन कथं प्रतीतिरिति वाच्यं ब्रह्मणोपि विषयकस्य घट
ज्ञानस्यैव घटावच्छिन्नचैतन्ये आवरणान्तरजननेन घटं न जानामीत्यादि च्छिन्ने आत्माभिन्ने ३५
घटा

सर्वात्मकब्रह्मावरणनिवर्तकत्वापातात् घटावच्छिन्नावरणमात्रनिवर्तकत्वं ... ५

जीवचैतन्येचानुसंधानेन तादृशत्वानुपपत्तेः न चैवं घटज्ञानान्तरावरणनिवृत्तौ ब्रह्मा
ज्ञाननिवृत्तिप्रसंगः आवरणनिवर्तकज्ञानस्य ... निवर्तकत्वस्याभावादिति वा
च्यं आपाततस्तं प्रतिपत्तेः परज्ञानेनाज्ञाननिवर्तकत्वस्य यमानंगीकारात् ब्रह्मज्ञानेन ... ६
मिति चेत् न सर्वावरणनिवर्तकत्वस्योपाधित्वात् यत्ज्ञानं यदज्ञानकृतं सर्वावरणं निवर्तयं
ति तदेव ज्ञानं तदज्ञानं निवर्तयतीति नियमस्य व्याप्तिः घटज्ञानं ... न तथा ब्रह्मज्ञानं च अन्य
था सर्वलोकब्रह्मस्फुरणायोगात् केचित्तु घटज्ञानेन घटाज्ञानं निवर्तयमिति प्रतीते
रवर्णनिवृत्तिविषयकत्वकल्पनायोगात् घटावच्छिन्नचैतन्यविषयाणि मूलाज्ञान
प्रयुक्तानि तन्मात्रप्रमाणजन्यापरोक्षज्ञाननिवर्त्यानि अनेकान्यज्ञानानीत्याहुः एता
धा निरहंकारा वृत्तिविच्छिन्नचैतन्याश्रयाण्येव ... घटमहं न जानामीति जीवानुभवविषय अन्यथा २
ताऽज्ञानानां स्यात् अज्ञानानुभवकाले जीवस्य घटावच्छिन्नचैतन्येनासंबंधात् ।१

८ इदमंशोपहितचैतन्यनिष्ठरजताकारपरिणामित्वं कथमिति वाच्यं इदमाकारांतःकरणवृत्ति ८
से

अहंटी यद्यप्यज्ञानमात्रूतामयविषयकंनाद्युवात्तथापि शुक्तित्वस्य कं तथापि त्रयस्य संभवात्त्ने त्या
०४ ज्यंइदंस्वरूपस्त्रवा अज्ञानं प्रातीतिकरजताद्युपादानं तथादि चक्षुरादिद्वारा निर्गतांतः
करणवृत्त्यपुमस्मिदमाकारावृत्तिर्निजायते तत्र प्रमातृप्रमाणप्रमेयदोषात्तत्र शुक्तिकाद्याका
राकारावृत्तिर्निर्गायते तत्र उक्तावच्छिन्नचैतन्यनिष्ठाज्ञानं तिस्रस्तेव नाश्विचर्मकतदा
कारवृत्तेरभावात् तत्राज्ञानं सादृश्यदर्शनोद्बुद्धसंस्कारादिसहितं सामान्यज्ञानरू
पेदमंशोपहितचैतन्यस्फुरणप्रमात्रादिदोषसहकृतं तमिदमंशोपहितचैतन्यनिष्ठर
जताकारेण परिणमते न च पक्षवाज्ञानस्यादिकारावच्छिन्नचैतन्यनिष्ठत्वेस्यो ०४
कावादिदशायां अंतःकरणविषयावच्छिन्नचैतन्ययोरभेदेनेदमंशावच्छिन्नस्य
स्या चैतन्यस्यापि पक्षवाज्ञानाश्रयत्वाविरोधात् अनएव शुक्त्यवच्छिन्नचैतन्यनिष्ठत्वो
क्तिरपि तस्य नविरुध्यते अयरजतं उत्पन्निकाल एव सुखादिवत्साक्षिणा भास्यते ३६

नश्यति नास्तिकं तु नानुपूर्वोत्तरकालयोस्तत्सद्भावे प्रमाणाभावात् न च समयांतरेन
देवेदंरजतमिति प्रत्यभिज्ञानात्तस्य ज्ञानसत्त्वमिति वाच्यं तत्रापि विशेषं विना प्रत्य
भिज्ञाना दर्शनेन तदानीं रजतांतरस्यैवोत्पन्नस्य तस्यात्वेनैकत्वेन प्रतीयमानत्वात् ननु
केवलनिरस्य साक्षिरूपस्य रजतज्ञानस्याविनाशित्वेन संस्कारजनकत्वाभावे स्मृतिजनकत्वा
भावात् तद्दृष्टं तु प्रत्यभिज्ञानमेष्टितव्यमिति चेत् उच्यते न तावदंतःकरणवृत्तिःस्मृतिर्भवति
णध इदमाकारपरिणमस्य तस्येदमावृत्त वृत्तिप्रदेशावच्छेदेन वृत्त्यंतरासंभवात् प्रदेशांत
रस्य रजतसंबंधाभावात् स्वप्रतीतेः पूर्वं अविद्यमानस्य रजतादेः इंद्रियसंप्रयो
गासंभवेनांतःकरणवृत्तेरनुसत्वे अविद्याभावित्वं स्थितिचेत् अंशतु पं
न तु रजतरूपतया परिणतायाः पश्चादविद्यायाः कथं रजतज्ञानरूपपरिणाम
ते अथवा मूलाविद्याया एवरजोंशज्ञानपरिणामोस्तु मैवं अइदमाकारांतः

१ इति चेत्सत्यं न तु पश्चादविद्याया एवेदमाकारांतःकरणवृत्तिदशायां शुक्तिरूपाविषयावच्छिन्नतेन इस्२
२ वच्छिन्नत्वेन च द्वैधाभाव्यास्थितयावच्छिन्नासारजताकारेण इदवच्छिन्नाभावज्ञानाकारेण परिणाम२

सा ज

अद्वै. टी. करणवृत्तिनाशादेवतदवच्छिन्नसाक्षिणोऽपिनाशात्तद्धितरजतानुसंस्कारोपपत्तेः यद्वत्त
१०५ वच्छिन्नचैतन्यं यावत्तां सत्तानिश्चयरूपं नवति तावद्वृत्तिनाशात् तावद्गोचरः संस्कारो जा
यत इति नियमाच्च इदमाकारवृत्त्यवच्छिन्नं द्विचैतन्यं इदमंशं न वृत्तिं दाश्रयाहंकारं रजतं
अधिष्ठानाज्ञानं च निश्चाय्य सतीति तन्नाशात्तावद्गोचरस्मृतिजनकसंस्कारोपपत्तेः न
नु इदमंशे साक्षिसंबंधार्थं अंतःकरणवृत्तिवत् रजतेऽपि तदर्थमविद्यावृत्तिरस्तीति चेत्
न अविद्यावृत्त्यंतःकरणावच्छिन्नचैतन्यरूपसाक्षिसंबंधार्थं योगात् अंतःकरणावच्छि
न्नचैतन्यस्यैव जीवव्यवहारांगसाक्षित्वस्य वक्ष्यमाणत्वात् इदमाकारवृत्त्यवच्छिन्न ६४
साक्षिणैव रजतस्याध्यस्तत्वेन न संबंधार्थमपि वृत्त्यपेक्षणम् अस्तु तर्हि इदमा १०५
कारांतःकरणवृत्तिवत् रजतादावावरणभिन्नतार्थं अविद्यावृत्तिरिति चेन्न रजतादेर
ज्ञातसाक्ष्यध्यस्तत्वेन सुखादिवदज्ञातत्वाभावत्वात् नन्वस्तु रजतादावपि सा
मात्रस्य तदाकारवृत्तिमंतरेण व्यवहारादृष्टेः तदर्थं रजताद्यावृत्तिः स्वीकर्तव्या अत एव सु ३७

खितिचेत् न प्रकाशमानस्य व्यवहारेऽन्यानपेक्षणात् सुखादौ तदपेक्षायाः आवश्य
वरणनिरूपितरूपप्रकाशजनकोपक्षीणत्वात् अतएव वस्तुरजतादावविद्यावृत्तिः सदवि
र्यसंमतास्वीकर्तुमयुक्ता किंच न तत्संस्कारव्यवहारयोरत्र तदाकारवृत्त्यपेक्षणेऽ न
वस्थानात् नत्सहावारस्य च नेरपिस्वविषयकसंस्कारार्थं व्यवहारार्थं च वृत्त्यंतरा
पेक्षणात् तत्प्रदीपनकारास्तु वास्तवार्थस्य वृत्तिं विना भानादर्शनात् शुक्तिकारजतभा
नेऽपि अविद्यावृत्तिरस्तीत्याहुः वस्तुतस्तु शुक्तिरजतादिभासकः साक्ष्येव न तु प्रमाता
प्रमातुरेव वास्तवार्थभाने वृत्त्यपेक्षेति न रजतवृत्त्या किंचित् प्रयोजनं सर्वजीवस्य रजतादि
व्यवहारजनकं साक्षी नाविद्यावच्छिन्नः किं तु अंतःकरणावच्छिन्न एव अविद्यावच्छि
था स
न्नस्य तत्त्वे सर्वभ्रमविषयाणां सर्वत्रापि रिनिर्वेद्यत्वप्रसंगः सर्वत्राविद्यावच्छि
न्नसाक्षिण एकत्वात् साक्ष्युपाधेः विद्याया एकत्वात् ननु साक्षिण एकत्वेपि यदंतः

धेर

२ तःकरणापेक्षेति तदुपहितस्यैव साक्षित्वं परंतु अंतःकरणस्याविद्योपादानकत्वात् तदवच्छिन्नसाक्षिणि २

अंतःप्रि
ति
१०६

करणवृत्त्यवच्छिन्नेयो भ्रमउत्पद्यते तदंतःकरणवानेयाविद्यावच्छिन्नसाक्षिवे
लात्वंप्रपत्तौचेत् आगतांतर्हि अविद्यावच्छिन्नसाक्षिणोप्यविद्यावच्छिन्नत्वंय
र्ततस्य ईश्वरस्य तु अंतःकरणानपेक्षयैव जगदवभासनादविद्यावच्छिन्नत्वेपु
रः साक्षीति विशेषः इयंचाविद्याप्रतिबिंबरूपजीवस्योपाधिभूताएकैव इ
जामेकामित्येकवचनैकत्वप्रयोगात् इंद्रोमायाभिरितिबहुवचनप्रयोगस्तु
जीवस्यस्वोपाधिमायाकार्यांतःकरणादीनांनानात्वपरत्वात् अन्यथानेकत्वक
ज्ञानकल्पनाप्रसंगात् ननुजीवोपाधिभूतमज्ञानमेकंचेत्तर्हिजगत्येकएवजी १०६
वः प्रसज्यतेतथा च देवदत्तादिनानाजीवव्यवहारःकथमितिचेत् उच्यते एकस्माद
प्यज्ञानात् उत्पन्नैस्तत्तदंतःकरणैः अवच्छिन्नानां प्रमातॄणां विवि
धकर्मकर्तृणां तत्तदंतःकरणोपाधिनिष्ठ एवसामंजस्येन नानाजीवव्यव

१ विविधादृष्टफलभोक्तृणां भेदेन जीवशब्दप्रवृत्तिनिमित्तप्राणधारणस्यांतःकरणविशिष्ट ३८

हारोपपत्तेरितिनन्वविद्याप्रतिबिंबस्यजीवस्य देवदत्तसुखं यज्ञदत्तेनाप्यनुभूये
त सर्वपादावच्छिन्नं चैतन्यं शिरोवच्छिन्नं चैतन्यसुखंनानुसंधत्ते यथा तथा देवद
त्तावच्छिन्नं सुखं यज्ञदत्तोनानुभवतीति वाच्यं तथापि एकशरीरावच्छिन्नस्य पादे मे
वेदना शिरसि मे सुखमित्याद्याकारेण सर्वावयवावच्छिन्नसुखदुःखाद्यनुभव
सर्वशरीरव्यापिनाविद्यावच्छिन्नैकजीवस्य देवदत्तशरीरे मे सुखं यज्ञदत्तशरीरे दुः
खमित्याद्याकारेण सर्वशरीरव्यापिसुखदुःखानुभवापत्तेरितिचेन्न तदुपपत्तेः
अविद्यावच्छिन्नजीवस्वरूपस्य सर्वशरीरेष्वनुस्यूतत्वेन तस्य सर्वशरीरावच्छि
न्नसुखदुःखानुभवित्वान्पायात् नचैवं यथा देवदत्तशरीरानुसंधानं तथैव
~~[illegible]~~ पादतलस्यकंटकोद्धरणार्थं हस्तौ व्यापारयति त
थासर्वशरीरेषु सुखदुःखानुसंधानं अविद्यावच्छिन्नोजीवःचेत्तदनंतरम्

अद्वै॰ सि॰ कंटकोद्धारणार्थमेव व्यापारयेदिति वाच्यं अविद्यावच्छिन्नस्य व्यापारयितृत्वाभावात्
२०७ तत्त्वतंतःकरणावच्छिन्नस्यैव प्रमातुर्जीवस्य देहादिव्यापारयितृत्वात् अत एवेश्वरः
सर्वशरीरेषु सुखदुःखादिकं जानन्नपि अप्रमातृत्वान्न तत्र तत्र सुखदुःखोत्पत्ति
नाशार्थं प्रवर्तते नन्वेवमेकस्मिन्नेवांतःकरणे साधनकलापसंपन्ने तेन ब्रह्मसाक्षात्का
रे उत्पन्ने एकस्या अविद्याया नष्टत्वात् तत्कार्यसर्वांतःकरणनिवृत्तौ सर्वमुक्तिप्रसं
गः न चेष्टापत्तिः शुकादिमुक्तिप्रतिपादकवाक्यान्मुक्तिसिद्धौ इदानींतनसंसारानुप
लंभप्रसंगात् किं चैवमेकस्मिन्नप्यधापुरुषे मुक्त्यर्थं यतमाने अन्यो न तदर्थं यते २०७
त अपि चैवं ब्रह्मनिष्ठगुरूपसर्पणादिविधिरूपकृध्येत कुतस्मात् ज्ञातृकारतारूपब्र
ह्मनिष्ठतायाः कुत्रापि पुरुषेऽसिद्धेः सिद्धौ वा तत्साक्षात्कारे एव सर्वेषामप्यविद्यानि ३९
वृत्तौ सतमविद्यानिवर्तकज्ञानार्थं गुरूपसर्पणेन किं च महानुभावस्य शुकादेरपि ब्र

अ॰ मुक्तेराधुनिकानामस्माकं मुक्तौ काप्यास्था इति अविश्वासेन कोऽपि मुक्त्यै न यतेतेति
चेत् मैवं शुकादिमुक्तिशास्त्रस्य ज्ञानादज्ञाननिवृत्तिरित्येतावन्मात्रे श्रोतृविश्वासे
तात्पर्यात्तु प्रमाणानि एकजीववादविरुद्धशुकादिमुक्तितात्पर्यकत्वस्याभावात्
किंच शुकादीनां श्रीकृष्णादिवद्भगवदवतारत्वेनाविद्याराहित्येन तन्निवृत्तिरूप
मोक्षासंभवात् अपि चैवं शास्त्रस्य तात्पर्यं यद्येकस्मिन् यतमानेनान्योऽपि मुक्त्यर्थं
नै॰ यततीति तदपि मंदं स्वस्मिन् संसारदुःखनिर्वेदो विजृंभमाणानां परस्मिन्
यतीतेति तदपि मंदं स्वस्मिन् संसारदुःखनिर्वेदो विजृंभमसहमानानां परस्मिन्
आंतरयुक्तिमुक्तिसाधनाभावसंशयवतां वा पृथक्प्रवृत्त्युपपत्तेः यदप्युक्तं सत
साक्षात्काररूपब्रह्मनिष्ठतायाः सिद्धिरिति तदपि न सकलविषयभोगपरित्यागा
गस्वर्वब्रह्मज्ञानैकव्यापारकस्य ब्रह्मनिष्ठतार्थत्वात् तत्साक्षात्का
रस्यैवाविद्याहितनत्वात् यदप्युक्तं शुकमुक्तावपि अविश्वास इति तदपि न शास्त्र

अर्हे·पी ३०८

६

प्रामाण्य विश्वासवतां इहांतमा ज्ञेत्ता विश्वासायोगात् अन्यथा नानाजीववादि दे
पिदृष्टत्वानंतका लेननत्वङ्गानमनुसन्धेयमेकत्वंभविष्यतीति प्राचीनास्त्त
इवसत्य एव सत्यायमविद्योपाधिकोऽशीवस्तन्प्रतिबिंब एव नच राहुकाशादिव
नहवाच्छिन्नः यथाह्ययंज्योतिरात्मा विवस्वानपो भिन्नाबहुधैकोनुगच्छन्
उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मा एकधाबहुधाचैव
दृश्यते जलचंद्रवत् इति प्रतिबिंबादित्यचंद्रवदिति प्रतिबिंबादित्यचंद्रदृष्टां २०८
तश्रुतेः किंच अवच्छिन्नस्य जीवत्वपक्षेनवच्छिन्नए वेश्वर इतिवक्तव्यंतु तस्य जी
वेश्वरयोरनुस्यूतस्य जीवव्यापृत्तेश्वरत्वायोगात् तथाच अविद्यावच्छिन्नजी
वप्रदेशवर्त्तिविद्याये धुपानत्वेश्वर इवंबेश्वरस्यनस्यात् अविद्यानवच्छिन्ने
श्वरस्यावच्छिन्नप्रदेशावस्थाकाशादिप्रदेशेविरोधेनास्तित्वनियमात् कार्यदे ९८

ध्य·

सर्वगतत्वं २

कूपवर्त्तिनएवोपादानत्वात् विंबेश्वरवादे तु नायं दोषः विंबत्वस्य व्याप्यवृत्तिधर्म
त्वात् विंबं व्यापकचैतन्यमेवेति प्रतिबिंबप्रदेशेपि विंबत्वविशिष्टेश्वरस्य सत्वात्
तस्य सर्वोपादानत्वादिकं विरुध्यते नच विद्यानवच्छिन्नत्वं नव्याप्यवृत्तिविंबत्वं
व्याप्यवृत्तीस्य किंचिनिगमकमितिचेत् दर्शनमेवात्र विनिगमकमित्या
हुः तथाहि कपिसंयोगानवच्छिन्नत्वं वृक्षेनुभूयमानंतत्संयोगवतिप्रदेशे
नानुभूयते तत्रैवहि तेजलगतप्रतिबिंबत्वप्रतियोगिकं विंबत्वमनुभूयमानं
दृक्षं तत्र व्याप्येवानुभूयत इति एवमविद्याप्रतिबिंबप्रतियोगिकं व्यापकचैतन्यनि
ष्ठं विंबत्वं चैतन्यव्याप्नि अविद्यानवच्छिन्नत्वं चैतन्यव्याप्यापीत्यन्यं नजु जीवोनव्र
ह्मप्रतिविंबः तथासत्यसंतन्नेदप्रसंगात् लोकेविंबप्रतिबिंबयो भेददर्शनात्
(तुतथाहि इमौविंबप्रतिबिंबावितिसत्रमलोकेनुदृष्यते मासुरवत्वमस्त
बो

मुखी

अद्वैत १०१ ६

...स्वत्वादिविरुद्धधर्मसंसर्गानुभवाद्भुमीयते च । अतत्र मुखत्वसंसर्गानुभ
वात् श्रीवास्तुमुखमेव प्रतिबिंबशब्दवाच्यं पदार्थांतरं इति वाच्यं मुखत्वसंसर्गानु
भवस्य मुखसादृश्यवैशिष्ट्यरूपत्वात् अस्तु वा दर्पणस्थमुखांतरं श्रीवास्तुमुखमेव
तदिति कः सहेत मैवं श्रीवास्तुमेवेदं मुखमिति प्रतिबिंबे मुखत्वसंसर्गं श्रीवास्तु
मुखाभेदप्रतीत्योः मदीयाः केशाः मदीयाः दंताः इत्यादिनानाविधप्रतीतीनां त
योरन्यतरानुपपादकत्वं विनापसरणे सति नास्ति दर्पणे मुखमिति बाधप्रतीतेश्च बा
धप्रसंगेनाभेदस्यैवाभ्युपगमात् न च दर्पणे छायाया एव मदीयमुखच्छायेयं मदीय
दंतच्छायेयमित्यादिबुद्धिः प्रत्ययैः बिंबप्रतिबिंबभेदानुपपादकैः विषयीकरणात् १०१
न श्रीवास्तुमुखाद्भिन्नं प्रतिबिंबमिति वाच्यं [illegible] प्रतीतीनां छायात्वाकारे
णैकजातिमत्त्वं मदीया दंताः मदीयाः केशा इत्याद्यभेदग्राहकाणामसंतत्वे लक्ष्य ६१

एवमेव तथा च असंतविज्ञानानेकप्रतीतिबाधप्रसंगात् अविलक्षणछायाकार
प्रतीतिबाधनमेव न्याय्यमिति किंच प्रसिद्धमुखच्छायाया आतपसंमुखत्वस्पष्ट
दृष्टत्वादिमत्वस्याभावात् दर्पणोपाधौ [illegible] मुख तथा स्पष्टदृष्टत्वादिमत्वेन च प्र ते४
तीयमानं मुखं छाया न भवतीति छायाप्रतीतिर्बाधितत्वादविसंमत एव किंच छाया
रहितादित्यादेरपि प्रतिबिंबदर्शनात् प्रतिबिंबस्य छायात्वमस्ति मुखादिबिंबचेष्टानुविधा
यकत्वं छायायाः सादृश्येन प्रतिबिंबे छायाव्यवहारो गौणः श्रीवास्तुमुखाभेद
प्रतिसंधानादेरेव चन मुखांतरं दर्पणे पारमार्थिकं मुखांतरस्योत्पत्तिकारणानां मुखा
द्युपादानार्थसंभवादपि न तत्संभवः दर्पणे आंतरिकपारमार्थिकप्रतिबिंबपदा
र्थांतरस्वीकारे च पर्वतादि प्रतिबिंबे दर्पणस्य दुर्वहत्वप्रसंगश्च न च दर्पण एव वि
चसंनिधानात् तदाकारेण परिणमत इति वाच्यं दर्पणद्रव्यस्य पारमार्थिकप

अद्वै.टी
११०
रिरणमहेतुत्वाहत्वेत्वादेरसंभवात् नचभेदप्रतीत्यनुपपत्तिर्नमुखस्य रजतवत्कल्पि
तंमुखं तस्मैवप्रतिबिंबमस्त्वितिवाच्यं अभेदप्रतीतीनां बाहुल्येन तद्बाधयोगे।
नाभेदस्यैवप्राबल्यात् किंच अनिर्वचनीयमुखं तत्स्वीकारे त्वमी धर्मीश्चक
ल्पनीयाइति गौरवमापद्येत अपिचदर्पणेमुखंनास्तीति मुखसंसर्गमात्रंप्रति
षिध्यग्रीवास्थमेवेदंमुखमिति बिंबमुखाभेदेन तत्प्रतिभानमपि तस्माद्दर्पणा
द्युपाधिदोषवशात् ग्रीवास्थमुखस्यैव दर्पणस्थत्वप्रसंगमुखविरूपाम हात्मको ११०
प्यदर्पणेमुखमित्यादिव्यवहारउत्तिनचमुखस्य होचक्षुः संनिकर्षमेवविनाशेप्यज्ञान धि३
ज्ञानान्यथानुपपत्त्यासुखाद्यपिदर्शनकदर्पणस्थत्वादिः भ्रमइतिवाच्यं दर्पणेगोसं
युक्तस्यस्यचक्षुषः त्वेनतत्तः पराप्रसमुखेन संयुक्तो नान्यायन ग्रामौ नानेन
मुखस्वरूपाद्धिद्यमानज्ञान ६२

जनकत्वात् तदुक्तं सुरेश्वराचार्यैः दर्पणाभिहतादृष्टिः पराहृत्यस्वमाननं व्याप्नुवं
त्याभिमुख्येन व्यस्तं दर्शयेन्मुखमिति ननु मुखादीनां रूपवतां सावयवानां वास्तु
प्रतिबिंबः तथापि नीरूपस्य निरवयवस्यात्मनः कथं स इति चेत् न तथावि
धरूपपरिमाणसंख्यादिगुणानामपि प्रतिबिंबदर्शनात् न चाश्रयसहितानां
मेवरूपादीनां प्रतिबिंब इति निराश्रयस्यात्मनः स कथमिति वाच्यं निराश्रय
स्वरूपादिरहितस्याकाशस्यापि प्रतिबिंबदर्शनात् न च तत्र प्रमाणाभावः
अतिस्वच्छोपि जले अतिदूरविशालाकाशदेशस्थत्वेन चंद्रादिदर्शनस्यैव प्रमाण
त्वात् अतिदूरत्वं विशालत्वं च बाह्याकाशगतमेव अतिस्वल्पगोःपदस्थजल
गताकाशेतदसंभवात् नन्वप्रत्यक्षस्याकाशस्य कथं प्रतिबिंब इति चेत् न
तस्यापि चाक्षुषत्वे पि नीलं नभ इत्याद्यनुभवेन साक्षिप्रत्यक्षत्वस्वा

अद्वै० टी ऽभ्युपगंतव्यत्वात् न च नीलं नभ इति प्रतीतेः साक्षिरूपत्वेऽपि चक्षुरन्वयव्यतिरेकानुविधा-
१११ नं व्यर्थमिति वाच्यं साक्षिभास्याकाशावच्छेदकप्रभामंडलग्रहणे तदुपयोगात् न च च-
क्षुर्व्याप्तप्रभामंडलप्रकाशं तेनापि कथं तदवच्छिन्नाकाशस्य साक्षिभास्यत्वमिति वाच्यं मुकुली-
कृतांशुकाकारवृत्त्यवच्छिन्नसाक्षिणा रजतभानवत् प्रभामंडलाकारान्तःकरणवृत्त्य-
वच्छिन्नसाक्षिणा आकाशभानोपपत्तेः न चैवं तदवच्छिन्नवाय्वादेरपि भानप्रसंगः
तस्य शुक्तिस्थरसादेरिव कदापि भानादर्शनेनात्यंतमयोग्यत्वादित्याहुः अत एव
वेति नेदमानसमाधिकत्वेन प्रमाणगोचरत्वादेवेत्यर्थः भेदेवास्तवभेदेन भेदप्रती-
त्यन्यथानुपपत्त्या हि सत्यभेदः [illegible] साधनीयः सा च प्रतीतिरन्यथाप्यु- १११
पपद्यत इति नार्थापत्तिर्वास्तवभेदे प्रमाणमित्याह वास्तवेति तद्देहंजीवपदे भेदं तत्त्व-
मस्यादिवाक्यार्थप्रमाणविरोधप्रसंगमुपसंहरति तस्मादिति तत्त्वमस्यादिवाक्यस्य

४३

४ प्रामाण्यप्रसंगः नहि नदीतीरादिवाक्यस्यासिद्धार्थबोधकस्य प्रमाणांतरयोग्यार्थकस्य प्रमाणां ४

युक्तार्थत्वं प्रमाणांतरविरोधश्च दृष्टः अन्यपरत्वाद्वेति विकल्पः आद्यं निरस्य द्वितीयमनू-
द्य दूषयति नापीति सिद्धवस्तुप्रतिपादकशब्दस्य मानांतरयोग्यार्थकत्वनियमात्
तत्र मानांतरप्रवृत्तौ अधिगतार्थगमकत्वेनाप्रामाण्यप्रसंगः तदप्रवृत्तौ च विसंवा-
दलक्षणेन तेनार्थसंवादाभावे प्रामाण्यं संजयति अपि च सिद्धवस्तुज्ञानात् प्रयो-
ज जनाभावादपि न वेदांतानां सिद्धब्रह्मवस्तुपराः प्रवृत्तिनिवृत्तिसाध्यमिष्टप्राप्त्यनिष्ट-
परिहाररूपं हि लोके प्रयोजनं दृष्टं न च सिद्धवस्तुबोधनात् प्रवृत्तिनिवृत्ती भवतः
तस्मात् तत्त्वा[illegible]धेनुमुपासीतेतिवत् तत्त्वमस्यादिवाक्यं जीवेऽद्वैतब्रह्मदृष्टिप्रकारकरू-
५२ पोपासनाविधानपरमिति पूर्ववादिनो हृदयं नापीत्यनेन प्रतिज्ञातेऽपरा[illegible]तोपासनापर-
[illegible] त्वाभावे छांदोग्यश्रुतिविरोधं हेतुमाह सदेवेति इयं हि श्रुतिरिदंशब्देन प्रत्य-
क्षादिपरिदृश्यमानं [illegible]कं जगत् सरामश्योत्पत्तेः पूर्वकालमभिधाय कार्यत्वादे-

अद्वै टी ११२ नपूर्वकालोपदिनकारणस्वरूपमुपलक्ष्यतस्यैवसत्त्वं सदेवेत्यनेनावधारयंती
कारणस्वरूपातिरिक्तं सत्तां न भवतीति अभिप्रेतितन्न सद्विलक्षणेनप्रपंचेन
नपारमार्थिकाद्वैतनाहानिविशि(ति)ष्टकमेवाद्वितीयमितिचसजातीयादिभेदशून्यतम
वधारयंती अद्वैतोपक्रमाभ्यासातीत्यर्थः तदैक्षततेतिइयंहि श्रुतिरेकस्य सतो बहुस्या
दित्युपादानत्वप्रतिपादनेन जगदुपादानकर्त्रैरैक्यं प्रतिपादयंती अद्वैतमेवोपपादयति
कार्यकारणयोस्तात्विकभेदाभावस्य शुक्तिरजतादौ प्रसिद्धत्वात् कर्तृपादानयोरभेदप्र ११२
तिपादनेन तत्कृतभेदाशंकानवकाशात् ननु घटादौ कर्तृपादानयोर्भेदोदृष्ट इति चेत्
न न (त्रा)पि मृत्कुलालावच्छिन्नचैतन्ययोरुपादानकर्त्रोर्भेदात् तदुपपादनेनेति।
अद्वैतोपपादनेनेत्यर्थः नचोपासनापरत्वेनतदुपपादानं युक्तं वागूर्ध्वाद्युपास ६४
नापरेषु (वा)क्येषु उपास्यप्रतिपादनादृष्टेः ऐतदात्म्यमिदंसर्वमित्यादौ वाक्ये तदु

पसंहारः स्पष्ट एवाद्वैतं चोपक्रमादिकथनं षड्विधतात्पर्यलिंगोपलक्षणं छांदो
ग्यश्रुतिविरोधकथनं च सर्ववेदांतविधीनांधोपलक्षणं उपासनायाः अश्रुतत्वं च उपा
स्तिध्यानयोरन्तर्वादवगंतव्यं यदुक्तं योयः सिद्धवस्तुप्रतिपादकः शब्दः समानांतर
योग्यार्थक इति तदप्यसंमतं उपक्रमोपसंहारावधृतार्थेन तात्पर्यके वेदांते न
दसंभवात् लौकिकवाक्यप्रमाणत्वोपाधिकं च यदप्युक्तं विसंवादलक्षणाप्रामा
ण्यमिति तदप्यनएव परास्तं प्रमाणांतरवैधर्म्यके हि वाक्ये प्रमाणप्रवृत्तेन दु श्वा५
पतिनसर्वत्र अन्यथा यागस्य स्वर्गसाधनत्वबोधकवाक्यानामपि तथात्व
प्रसंगात् यच्चोक्तं सिद्धवस्तुज्ञानात् प्रवृत्तिनिवृत्त्यसंभवेन प्रयोजनाभावो वेदांता
नामिति तन्न असते फलं हि द्विविधं क्रियासाध्यं ज्ञानसाध्यं च क्रियासाध्यं च द्विविधं प्रवृ
त्तिक्रियासाध्यं यागवृत्तादिनिवृत्तिक्रियासाध्यं पापसर्पपरिहारादि ज्ञानसाध्यमपि
हारा

अ॰ ८१ द्विविधं विद्यमानविस्मृतकंठगतचामीकरप्राप्तिरूपं अविद्यमानरज्जुसर्पपरिहाररूपं च एवं च सति
११२ अद्वैतानंदात्मकसिद्धवस्तुबोधकवेदांतवाक्यानामप्रवर्तकत्वात् क्रियासाध्यफलजनकत्वा
भावेपि ज्ञानद्वारा अज्ञाननिवृत्तिपरमपुरुषार्थरूपब्रह्मप्राप्तिफलकत्वं कालत्रयेप्यविद्यमा
नाविद्यातत्कार्यप्रपंचरूपानर्थपरिहारफलकत्वं च केनोवार्यते तस्मान्न वेदांतानां ब्रह्मो
पासनाविधायकत्वमित्येतदनवद्यं ननु वृद्धव्यवहारेण सर्वस्य शब्दस्य कार्यान्वितएव
शक्तिग्रहात् सर्वे शब्दाः कार्यान्वितार्थका एव यथा उत्तमवृद्धेन प्रयुक्तं गामानयेति
शब्दश्रवणानंतरं प्रयोज्यवृद्धो गवानयने प्रवर्तते तां च प्रवृत्तिं दृष्ट्वा बालस्तटस्थः प्रवृत्त्या
लिंगेन प्रयोज्यस्य प्रवर्तकज्ञानमनुमिमीते तच्च प्रवर्तकज्ञानमिदं मम कार्यमित्या
कारकं कार्यताज्ञानमेव स्वस्य चेष्टनादिप्रवृत्तौ तस्यैव हेतुत्वावधारणात् तस्य च शब्दानन्य ११२
नादि कार्यताज्ञानस्योत्तमवृद्धप्रयुक्तवाक्यमेव कारणमिति वा कल्पयति तत्तत्पदानां विविधपदो
पस्थापितकार्यान्विततत्तत्पदार्थेषु आवापोद्वापाभ्यां संगतिं गृह्णातीति कार्यान्वितएव
वक्तव्यार्थः ननु वेदांता अपि शब्दा विशेषात् ब्रह्मज्ञानं कार्यमित्याकारज्ञानकार्यता
परा ब्रह्मज्ञानाभ्यां सकार्यतापरा वाच्याः वेदेषु नवहंत प्रत्यगभिन्नब्रह्मबोधनमात्रपर्यवसं ६५

॰ कार्यपरादपि पुत्रपदस्यार्थे संगतिग्रहात् न च तत्रापि देवदत्तादिपदानां प्राथमिक ॰

भा इति वदितावन्मात्रपर्यवसन्नास्तु: तदा श्रवणमात्रादेव ब्रह्मबोधसिद्धेर्मननादिविधानं
व्यर्थमेव स्यादिति चेत् अत्रोच्यते नतावत् पदानां कार्यान्विते एव संगतिग्रह इति नियमोस्ति
देवदत्त पुत्रस्ते जात इति वाक्यं श्रुत्वा कार्यान्वितसंगतिग्रहस्तु रोधेन स्याहीति विशिष्टस्मेरमुखत्वात् ध्याहृ॰
नादौ प्रवर्तमानयोः पितुः प्रवृत्तिकार्यं दृष्ट्वा बालः प्रवर्तककार्यताज्ञानमनुमाय पुत्रादिपदानां
कार्यान्विते संगतिं गृह्णातीति वाच्यं वाक्यार्थावबोधकशब्दप्रयोगसमनंतरोत्पन्नमुखविकासादि
लिंगकहर्षेणैव जन्मनादिप्रवृत्तेः पूर्वमेव स्वदृष्टत्वेन पितुः पुत्रजन्मज्ञानमनुमाय पुत्रेतु
त्रपदस्य संगतिग्रहात् स्वहर्षमात्रं पुत्रजन्मज्ञानानुमापकं न भवतीत्यभिचारित्वादिति वा
च्यं पुत्रपदांकितपत्रादिदर्शनसहकृतवाक्यजन्यहर्षस्य पुत्रजन्मज्ञानाव्यभिचारित्वात्
अपि च कार्यवाचकपदस्य न कार्यान्विते शक्तिग्रहः संभवति क्रियापदार्थातिरिक्तकार्यान्तरस्या
भावात् स्वस्य स्वेतान्वयासंभवाच्च यदुक्तं ब्रह्मज्ञानकार्यताविधिपरा वेदांता इति तन्न
ज्ञानस्याविद्यानिवृत्तिरूपदृष्टफलस्य विधेयत्वासंभवात् किंच विधेयमपि तद्ज्ञानं श
ढं. ब्दं वा अपरोक्षं वा नाद्यः अधीतव्याकरणस्य पुंसः शब्दश्रवणमात्रेण विधिं विनापि तदुत्पत्तेः धि॰
न च श्रवणादिजन्यं अपरोक्षनिश्चयरूपं ज्ञानं विधेयमिति द्वितीयपक्षोपि संभवति अव

अद्वै.टी
५४ एतादृशविधिफलस्य तस्य यागफलस्वर्गस्येवाविधेयत्वात् किंच ब्रह्मज्ञानविधिपरत्वे ह्यात्मा वा
अरे द्रष्टव्य इत्यादिवाक्यात् ब्रह्मसिद्धिर्मिद्धेतो मते कीदृशं ब्रह्म सिध्यति न तावदद्वैतं तत्र प्र
माणाभावात् न च ज्ञानविधिप्रकरणपठितात् सत्यादिवाक्यादेकमेवाद्वितीयमित्यादिवाक्या
द्वैतसिद्धिरिति वाच्यं तेषां विधिपरत्वात् उभयपरत्वे च वाक्यभेदप्रसंगात् न चैवं देवताधिकरण धि
न्यायेनोभयपरत्वं भविष्यति देवताधिकरणे हि दर्शपूर्णमासविधिप्रकरणस्थावांतरवाक्यै
रज्ञातार्थप्रतिपादकैर्यन्न दुःखेन संभिन्नमित्यादिभिः स्वर्गदेवतादिविग्रहादिकं सिध्यतीति स्थि
तं तथात्मा वा अरे द्रष्टव्य इत्यादिवाक्योक्तज्ञाने विहिते कोसौ विधीयमानज्ञानविषय
आत्मेत्यपेक्षायां प्रवृत्तान्यद्वैतात्मप्रतिपादकानि वाक्यानि ज्ञानविधिप्रकरणस्थानि सर्व ११४
वेदांतप्रत्ययन्यायेनोपसंहृतगुणवांतरस्थसत्यज्ञानवाक्यान्विवृतज्ञानविधेर्ज्ञातासर्व
कारणपरिच्छेदाद्वैतात्मपरत्वमपि नवंगीति वाच्यं यद्यप्यनन्यतासर्वकादपि वाक्यात् अवां
वा तरवाक्यभेदेन अर्थांतरमपि सिध्यति तथापि सोर्थः प्रमाणांतरविरुद्धो यदि न
स्यादेव अन्यथा यजमानः प्रस्तर इत्यादिवाक्यानामपि स्वार्थतात्पर्यकत्वप्रसंगः अ
त्र वाद्वैतप्रतिपादकावांतरवाक्यानां द्वैतवस्तुग्राहकप्रमाणविरोधः स्पष्ट एवेति ततः ५६

कथं तत्सिद्धेन न च न च मते प्यद्वैते व्युत्पत्ति प्रमाणांतरविरोधस्तु तस्येति वाच्यं निरवकाश
द्वैतश्रुत्यनुरोधेन प्रत्यक्षादीनां सावकाशिकमिथ्यार्थविषयत्वकल्पनात् तेषां प्रत्यक्षादीनां वै
कास्यावाप्यतत्त्वरूपपरमार्थत्वविषयिकरणग्राह्मके च वाक्यार्थज्ञानावृत्तिरूपाभ्यासविधिपक्षे
भ्या वि अभ्यासविधेः किं मोक्षः फलं साक्षात्कारो वा नाद्यः अभ्यासक्रियायाः सातिशयत्वेन तज्ज
न्मोक्षस्यापि स्वर्गादिवत् तथात्वापत्तेः तथा च स्वर्गवदनित्यत्वं चस्यात् कश्चिद्विमामास्मार्त्तं ज्ञा
नमभ्यस्य शरीरं त्यजति कश्चिद्दीर्घं कश्चिद्यावज्जीवं न द्वितीयः अत्र वृत्त्यात्मज्ञानावृत्ति ति
रूपाभ्यासस्याप्रमाणत्वेन प्रमारूपसाक्षात्कारजनकत्वात् ज्ञानाभ्यासजन्यसाक्षात्कारस्य
कामिनीसाक्षात्कारवत् अप्रमात्वेन वस्तुसिद्धिर्दौर्लभ्यात् न च विहिताभ्याससहकृतं
मन एवात्र प्रमाणमिति वाच्यं ज्ञानोपादानत्वेन मनसोप्रमाणत्वस्योक्तत्वात् अभ्यासस्य
विपरीतभावनारूपप्रतिबंधनिरासद्वारा साक्षात्कारोपयोगित्वस्य रत्नपरीक्षादौ दृष्टत्वा
तस्य दृष्टफलत्वेनादृष्टवदविधेयत्वाच्च ननु पदार्थानां काव्यान्वितेत्यत्र भावेपि इतरा
न्वितेत्यन्विर्वक्ष्यां तथापि पूर्वपदात् पूर्वपदार्थज्ञानाद्यवहितोत्तरक्षणे शुकः इत्थं
वेतिविशेषान्वयाकांक्षायते सा च सामान्यान्वयज्ञानं विना न संभवति सामान्यज्ञान

अद्वै.सी पूर्वकत्वात्तद्विशेषाकांक्षायाः ज्ञत्वसामान्यात्तद्ज्ञानं घटत्वाद्यवच्छिन्नविहितकारत्वएवजा
११५ यत इत्यभिघटशब्देनान्वितेष्टाकाङ्क्षानिवृत्तेः तथा च तत्त्वमस्यादिपदानामप्यन्वितार्थपरत्वादखं
डार्थकत्वं वाक्यस्य नेति चेत् न तेषु नागतस्यैकायेन रम्भावदन्वितेऽशस्यापि त्यागादिस्यत्वं
एकदेशेनानन्वितत्वमादिवाक्यस्यान्यपरत्वमाशंक्यनिराकरोतिनाद्येति नेदाभेदेऽपारमा
र्थिकोऽतोनैकस्मिन्योर्धर्मिण्येकस्मिन्निति विकल्प्याद्यं प्राह विरुद्धयोरिति कालभेदेन विरुद्धयोरे
कत्रसंभवोस्त्वीतितद्वारणाय एकदेति देशभेदेन तत्संभवोस्त्वीति अपसिद्धिवारणार्थमेकत्रे
त्युक्तं अत एव दूषणं तस्मादुमुक्तावितिमुक्तौ भेदप्रयोजककर्तृत्वादेरभावप्रयुक्तो नेति भा
उ वः ननु ज्ञानाभेदेऽशं ज्ञानिवृत्तौ मुक्तौ केवलाभिन्नस्वरूपेणावस्थितिर्भविष्यतीति चेत् न
तत्त्वमस्यादिवाक्यबोधितभेदाभेदाभ्यासजनितसाक्षात्कारस्य भेदाभेदविषयत्वनियमेन ११५
स्वविषयीभूतभेदनिवर्तकत्वायोगात् नचोभयाभ्यासजनितसाक्षात्कारस्यैकविषयत्वेमा
नमस्ति नचखण्डाकारः केवलाभेदविषयः तथापि तत्त्वमस्यादिनिर्दिष्टशब्दविष
यस्य ज्ञानेनानिवृत्तिर्न संभवतीत्याह तत्त्वमस्यादीति एकनिष्ठत्वासिद्धिरिति तन्निष्ठ ६७
भिन्नभिन्नभेदाभेदस्येत्युक्तं वा कस्याखंडपरत्वाभावं प्रकारान्तरेणाशंक्यनिराकरोति

अत एवेति वक्ष्यमाणयुक्तेरित्यर्थः सत्यं ज्ञानं च आदिपदेनानन्दादिपरिग्रहः नहि
शिष्टब्रह्मणो वा जीवाभेदपरं तत्त्वमस्यादिवाक्यमस्तु नाखंडार्थमित्यर्थः एवं सत्यार्थमा
ह सत्यत्वादीनामित्यादिना सत्यत्वादिकं ब्रह्मणः स्वरूपान्न भिन्नं वाऽभिन्नं वा इति विकल्प्या
द्यमनूद्य दूषयति ब्रह्मणो भेद इति पारमार्थिकवैशिष्ट्यस्यासंगेऽत्मन्यसंभवेनेत्यर्थः अ
स्तु तर्हि अपारमार्थिकं वैशिष्ट्यमित्यतः ऽपाद्यमिथ्येति श्रुतेस्त्वबाधेककत्वादिति भावः द्वि
तीयमनूद्य दूषयति ते भाभिन्ने चेति वैशिष्ट्यासंभवे हेतुमाह समवायादेरिति आदिप
देन सिद्धान्तैकदेश्यभिमतसमानसत्ताकभेदाभेदघटिततादात्म्यसंबंधपरिग्रहः यद्य
पि समवायतादात्म्यसंबंधोभिन्नयोर्भवतः तथापि तयोः सामानाधिकरण्यप्रतीतिरेवा
नाऽऽधापि भिन्नयोरेव संबंधवितिकश्चित् ब्रूयात् तं प्रतीतयोः संबंधत्वनिराकरणेऽकि
रिति द्रष्टव्यं श्रुतिविरोधश्च सत्यत्वादिविशिष्टब्रह्मणो जीवाभेदेन तत्त्वमस्यादिवा
क्यार्थ इत्याह एकधेवेति एकधा एवानुद्रष्टव्यमिति यावत् ब्रह्मज्ञानिपरिकेति ब्रह्म
पाद्यत्वाहित्वेन त्रिविधपरिच्छेदशून्यस्येत्यर्थः अनेन वरस्यादिप्रतिपादकवाक्यानामखण्डार्थका

अर्थ॰ टी ११६ न्यायाचोदितुं चपेतिअत्यर्थवर्योऽतो नयापिनवैशिष्ट्यं वाक्यार्थ इत्याह तत्त्वमस्येति नेदमेत्यर्थः
तदेवावोहं एवं वाक्यार्थावः तत्त्वमस्यादिवाक्यस्यान्यार्थत्वाभाव इति देशिकृतं तरहस्यफलितमुप
संहरन्निगमयति नाहमेनेनाखंडैकरसेन चैतन्यस्वरूपदलक्ष्यत्व योग्यतामाह प्रमात्रादी
ति नाभ्यादिति तादृशेनाखंडैकरसेन चैतन्यस्वरूपलक्ष्यत्वयोग्य अंतःकरणमत्र प्रमात्रादि
नोच्यते आदिशब्देन चलक्रमो स्थूलं प्रमात्रादिसाक्षिचैतन्यं हितत्प्राप्यः पिंडवह्निरिव प्रमा
त्रादिकं भासयत् ततो विविक्ततया भासते इति ऊढाऊढरूपस्वं पदवाच्यं इत्युच्यते तेनतोऽज
ऊंशोपरित्यज्यते तस्यात्पर्शो लक्ष्यत इति भावः ननु परोक्षेण ब्रह्मचैतन्येनापरोक्षप्रतिपादने वाक्यं
निःफलमेवस्यात् परोक्षचैतन्यस्याविद्याद्यनिवर्तकत्वात् इति चेत्तमैवं परोक्षत्वस्य वृत्त्यण
धक॰ विशेषेन तत्परित्यागेन चैतन्यमात्रस्य तत्पदलक्ष्यत्वात् त्वंपदलक्ष्यैव परोक्षत्वं नत्वागमई ११६
नियमात्परोक्षात्वब्रह्मेति श्रुत्या तस्यै चैतन्यस्य रूपत्वादित्येतदभिप्रेत्याह अपरोक्षचैतन्ये
नेति यद्यपि श्रवणाद्यप्यर्थांतरतात्पर्यमस्ति वेदान्तानां तदपि महातात्पर्यं निर्विशेषे ब्रह्म
णीति वेदांतशास्त्रं ब्रह्मण्यत्र परमित्युक्तं ननु तत्त्वमस्यादिवाक्यं चेज्जीवब्रह्मणोरभेदबोधकं त
र्हि सर्वस्यापि मुमुक्षुत्वस्य श्रवणमात्रात्कृतार्थता नोदयइत्याशंक्य साधनानुष्ठानाभावा ५८

तन्नज्ञानोदय इत्यभिप्रेत्य शास्त्रीयज्ञानसाधनानि स्वरूपयन्त्वाक्यार्थपरोक्षज्ञानोत्पत्तिप्रकारं प्र
तिपादयति अतइत्यारभ्य नयोरित्यंतेन यतस्तत्त्वमस्यादिवाक्यं जीवब्रह्मणोरैक्यपरं अतस्तत्त्वम
स्यादिवाक्यार्थं गुरुमुखात् सम्यग्बुध्विनिश्चित्य तदेकनिष्ठो नयोरिति संबंधः गुरुमुखादित्यादि
नाम्नव एक तर्थतात्पर्यविचारतत्राधिकारिणमाह विरक्त इत्यादिना इदं च ब्रह्मेवानित्यं अन्यत्सर्वं
क्रियाजन्यत्वादनित्यं तथा स्वरूपस्यानित्यानित्यवस्तुविवेकस्य वैराग्यहेतोरुपलक्षणं परीक्ष्य
लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेनेति श्रुत्या कर्मसंचितस्य हिरण्यगर्भलोकस्य पर्य
न्तस्य सुखसाधनस्यानित्यत्वप्रतिपादिकया वैराग्यं प्रति विवेकस्य हेतुत्वप्रतिपादनात् न चानि
त्यानित्यवस्तुविवेकः सर्वस्य कथं न भवतीति वाच्यं तमेतं वेदानुवचनेनेत्यादिश्रुतिविहितकर्मसाध्य
त्वान्नुष्ठानुजन्यांतःकरणशुद्धेस्तद्धेतोरभावात् ऐहिकामुष्मिकफलेषु चक्षुरादियासमसाधनत्वक्षयित्वादि
दोषदर्शितुरसाधकरूपवैराग्यस्य फलमधिकारिविशेषणं नरमाह शांतीति आदिशब्देनोप
रतितितिक्षासमाधानश्रद्धा गृह्यंते शांतिर्नाम श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः
दांतिर्नाम बाह्येंद्रियाणां तेभ्यो निग्रहः इति तयोर्भेदः शांतिदांतिमुनिपुत्रोदांतो वली वर्द इति वि
धितो निवृत्तिः उपरमणं उपरतिः संन्यासः तितिक्षा शीतोष्णादिद्वंद्वसहिष्णुता श्रद्धानाम
सं

अ॰टी॰ आचार्यवेदवाक्येषु आस्तिक्यबुद्धिः इदमित्थमेवेति विश्वासः श्रवणादीनां साधानेन अंतः बहिः क
१७ रणानां प्रेरणं समाधिः उपरमणं तु जिज्ञासोत्तरं द्रष्टव्यं शांत्यादेः कार्यमाह मुमुक्षुरिति मो
नाम अविद्यातत्कार्यरूपबंधनिवृत्तिः गलिताखिलभेदनिर्विशेषब्रह्मावस्थानं चावाप्तिश्च तयोरपि श्रुति
परिग्रहीतत्वात् तस्मिन् इच्छा मुमुक्षुत्वं सोऽस्ति मुमुक्षुस्तत्साधनकांक्षमाणः तरति शोकमात्म
वित् ब्रह्मवेद ब्रह्मैव भवति इत्यादिश्रुतिभ्यो ब्रह्मज्ञानं मोक्षसाधनमिति ज्ञात्वा तज्जिज्ञासत तदस्मा
इ ब्रह्मजिज्ञासुरिति ब्रह्मज्ञातुमिच्छतीत्यर्थः जिज्ञासोत्तरकालं श्रवणं मननं च कर्तव्यमित्याह तत्र
स्यादिति श्रवणं नाम गुरुप्रधानस्य शिष्यस्य बुद्धिः तात्पर्यलिंगैः षड्भिः अशेषवेदांतानां तात्पर्यावधा
रणं तदेतत् गुरुमुखान्निश्चित्य सम्यक् उपपत्तिभिः श्रवणमननशब्दपर्यायः अत एव श्रवणानि दि
यति कृत्वाद्योतेश्चकारः सच श्रुतस्याद्वैतवस्तुनो वेदांतानुगुणयुक्तिभिरनुचिंतनमाह निश्चयस्य सम्भ
स्य वृत्वं नाम बाधकदूषणनिरासपूर्वकत्वं अथवा श्रवणेन तत्त्वार्थविषयिणी अन्यार्थत्वसंभाव
नानिराक्रियते मननेन च प्रमेयगता असंभावनानिर्विकल्पधर्मवतो जीवपरयोः कथमैक्यमित्यादि सा
कारानिरस्यते मननोत्तरकालं साविधि निदिध्यासनं कर्तव्यं तामाह यावद्विशदीनां अनुसंधानं ६९
निदिध्यासनं तच्च विजातीयप्रत्ययतिरस्कारेण अहं ब्रह्मास्मीति प्रत्ययप्रवाहीकरणं तत्फलं च

वा
श्रवणवासनाप्रत्ययो नाहं ब्रह्मेति विपरीतभावनानिराकरणमिति निदिध्यासनोत्तरं समाह तदेक
निष्ठ इति सविकल्पक निर्विकल्पकरूपद्विविधसमाधिपरो भवेदित्यर्थः तदेकनिष्ठतायाः पुरुषार्थ
प्रयोजकत्वं अस्याः दर्शयति ब्रह्मसंस्थ इति तस्मात् अन्यवहितं फलमाह ततश्चेति तत्समिपावः अहं ब्र
ह्मैवेति वासनादार्ढ्यं परिपाकप्राप्तमस्यादीति आदिपदेन अयमात्मा ब्रह्मेत्यादिवाक्यपरिग्रहः
यद्यपि पूर्वं तत्त्वमस्यादिवाक्यार्थः श्रुतो मतश्च तथापि विपरीतवासनादिप्रतिबंधत्वान्न साक्षात्का
रतामापन्नः इदानीं निदिध्यासनसमाधयनुष्ठानेन प्रतिबंधके निवृत्ते पूर्वं श्रुतवाक्यादेव प्रसंग
इत्यर्थः तदुक्तं पंचदश्यां प्रकरणं तत्त्वविवेकाख्यप्रकरणे अमुना
मिव ब्रह्मसाक्षात्कारउपपन्नमित्यर्थः तदुक्तं पंचदश्यां प्रकरणे तत्त्वविवेकाख्यप्रकरणे अमुना
वासनाजाले निःशेषं प्रविलापिते समूलोन्मूलिते कर्मपारात्म्ये कर्मसंचये वाक्यमप्रतिबद्धं सत्
वासनाजाले निःशेषं प्रविलापिते समूलोन्मूलिते कर्मपाशाख्ये कर्मसंचये वाक्यमप्रतिबद्धं सत्त्वा
परोक्षं प्रत्ययं तदेव नित्यं तु ब्रह्मज्ञानाभ्यासरूपो निदि
तत्त्वज्ञानं च नासिते करामलकवद्बोधमपरोक्षं प्रसूयते इति नुनु शब्दज्ञानाभ्यासरूपो निदि
ध्यासनात्मक इत्यत्र मनसो वाक्यस्य भिन्नब्रह्मसाक्षात्कारे तु कि मन्यत्र कुत्रापि प्रत्यस्य
ज्ञानाकारहेतुतया इति चेन्न ज्ञानाभ्यासस्य प्रमाणस्य प्रमाणानुकूलत्वांगीकारात् मनोनप्रमाण
मिति बहुशः समर्थितत्वात् नच ब्रह्मसाक्षात्कारार्थी मेव तयोरन्यतरस्य प्रमाणत्वं किंस्यानि
तिवाच्यं तयोः सामान्यकारणत्वसाक्षात्कारे गर्हे इंद्रियकल्पनातः ... करणत्वस्य प्राप्तस्य
कर

कर

अद्वै.सि. नासाक्षात्कारत्वमुक्तम् स्मनमेव वरमितिन चेंद्रियजन्यज्ञान एवापरोक्षत्वमिति कथं शाब्दज्ञानस्य तथात्वमि
११८ ति वाच्यं त्वन्मतेऽपरोक्षत्व[illegible]निरूपणात् तथाहि न किं जाति रूपाधिर्वा नाद्यः नमैवतेप्रत्य
भिज्ञायामपरोक्षत्वा नाचप्रसंगात् नत्तां शे सा साक्षात्कारोऽमी त्यनुव्यवसाया नावेन तदंशेऽपरोक्ष
त्वजातेरभावात् अत एव वेदमंत्रोपिसा नास्ति जातेरव्याप्यवृत्तित्वास्वीकारादिति अत एव लौकि
कसाक्षात्कारत्वरेस्य जातित्वपक्षेऽपिन नापींद्रियजन्यज्ञानत्वरूपोपाधिपक्षेऽपि इंद्रियजन्यत्वाव
च्छेदकधर्मानिरूपणात् अपरोक्षत्वस्यावच्छेदकत्वे आत्माश्रयान्योन्याश्रयापत्तेः श्रुक्तिरजतसुखा
दिसाक्षात्कारेषु तदभावप्रसंगात् च तेषां केवलसाक्षिभास्यत्वात् उक्तं चैतदधस्तादिति किंतर्हि
वृत्तिज्ञाने अपरोक्षत्वं सिद्धांते इति चेत् उच्यते अपरोक्षार्थविषयत्वमेव न चाविविधं इंद्रिय ११८
जन्यं किंचिच्छब्दजन्यं चेति शुद्धजन्म[illegible]विषयकज्ञानस्य साक्षात्कारत्वं नहीदंन्यते नन्वनाद्यज्ञा
नावृतस्य ब्रह्मणः कथमपरोक्षत्वं येनतद्विषयिण्या वृत्तेरपरोक्षत्वं स्यात् इति चेत् उच्यते ब्र ५०
ह्मणः अनावृतत्वेऽपि यत् साक्षादपरोक्षाद्ब्रह्मेति श्रुत्या स्वतः स्तस्यापरोक्षत्वाभ्युपगमात् क
थं तर्हि तस्य दृश्यात्वस्यापरोक्षत्वं प्राक्साक्षात्कारे वेदांततद्वतिचेत् उच्यते कल्पितपरोक्षत्वविषयक
त्वात् च्छावहारस्य वास्तवापरोक्षत्वस्य च श्रुतिप्रतिपाद्यत्वादविरोधः नचेंद्रियजन्यघटादिवन्नेक ५०

भेदत्वस्यार्थापरोक्षत्वस्यपूर्वमनुक्तत्वात् धर्माधर्मयोरपि यद्यपि सुखादिवत्साक्ष्य

त्वमपरोक्षत्वं तद्विषयस्य जडस्य स्वतः परोक्षत्वादिति वाच्यं अनावृतसाक्ष्यभेदोऽस्ति तथापि तयो
यदं रयोग्यत्वादेव नापरोक्षत्वव्यवहारविषयत्वं यथा परमतेऽपि तयोर्मनसा संयुक्तसमवायसंनिकर्षे विद्यमा
नेपि अयोग्यत्वान्नापरोक्षज्ञानविषयत्वं यथा वा वायोश्चक्षुःसंनिकर्षे विद्यमानेपि अयोग्यत्वा
देव नापरोक्षज्ञानविषयत्वमिति प्रत्यगभिन्नब्रह्मसाक्षात्कारेकर्तव्यताहृति[illegible] लेति स्मृत्वा
यमानाविद्यानिवृत्तिब्रह्मणोऽभिन्नानिवृत्तेः प्रतियोग्यसमानकालत्वेन प्रतियोग्यनाधारत्वेन
चसाधिकरणत्वेन च अविद्यासमानकालीनाविद्याधिकरणनिरधिकरणत्वस्वरूपत्वानु
पपत्तेः नचैतस्या अविद्यानिवृत्तेः सत्वेऽद्वैतश्रुतिविरोधः [illegible]चानिर्वचनीयाविद्याप्रतियोगिक
कत्वा निवृत्तेर्न संभवति प्रतियोगिसमानसत्ताकत्वाभाव[illegible]लक्षणत्वे चार्थक्रियोपादानकत्वाप्रासेः
अविद्यायाः अभावकालेतदभावप्रसंगः सदसदात्मकत्वे चोभयपक्षोक्तदूषणप्रसंगः सदा
सदात्मकत्वं च विरुद्धत्वादनुपपन्नं तत्त्वान्यत्वाभ्यां नचेंतितिवाच्यं एतद्दोषपरिहारायाविद्यानिवृत्तेः
पंचमप्रकार[illegible] प्रत्यपीपदन्निति अथापरमतं यथा निर्वाच्याविद्यातत्कार्यप्रपंचस्या
धिष्ठानरूपात्यंताभावः स्वीकृतः तद्वदविद्यानिवृत्तेरप्यधिष्ठानब्रह्मस्वरूपत्वस्वीकारा
देकिंबाधकानिवृत्तेः प्रतियोगिसमानकालीनत्वात् संभव एव बाधकमितिचेत् न अ

यक्षानुरूपो बलिरित्याचार्याः २

३ त्वाभ्युपगमात् तदुक्तं नसन्नासन्नसदसन्नानिर्वाच्योपितत्क्षयः

अद्वै: सि चिद्रूपस्य कल्पितात्यंताभावात्मकत्वे प्रत्यक्षबाधकस्य सद्भावात् न अत्यंताभावस्याधिकर
११९ णरूपत्वस्य प्रतियोग्याधारत्वं निरधिकरणत्वं वा संभवति ननु अधिकरणभिन्नसत्ताकप्रति
योगिकाभावस्याधिकरणं इदं प्रतियोग्यनधिकरणत्वसमाधिकरणत्वेपि अधिकरणाभिन्न
सत्ताकप्रतियोगिकाभावस्याधिकरणमेव प्रतियोग्यधिकरणत्वमिति किंचन्न विरुध्यत इति
चेत् नहि अधिकरणभिन्नसत्ताककल्पिताविद्यादिसोपि न तु पक्षोक्तं अविद्यानिवृत्तेः
पंचमप्रकारत्वं तत्रैव मतिबोधनमात्रं सर्वं समाधिं आत्मत्वरूपप्रकारद्वयातिरिक्तप्रकारा
भावादेः तस्माद्यत्र मेव पक्षोतिदुःसोयदविद्यानिवृत्तिर्ब्रह्मस्वरूपान्नातिरिच्यते इति न चैवम
विद्यानिवृत्तिफलकतत्वज्ञानवैयर्थ्यापत्तिः अधिष्ठानब्रह्मरूपायास्तस्याज्ञानात् पूर्व ११९
मपि सत्वात् न चात्माभिव्यक्तिरेव ~~ज्ञानसाध्येति ब्रह्मरूपात्मनस्तस्याज्ञानात्~~ पूर्वमन
~~भिव्यक्तत्वात् नचात्माभिव्यक्ति~~रेव ज्ञानसाध्येति वाच्यं तस्या अपि अविद्यानिवृत्तिरू
पत्वं तदावरणनिवृत्तिरूपत्वं वा वाच्यं तदुभयमपि कल्पितप्रतियोगिकत्वेन चिद्रूपब्र
ह्मस्वरूपत्वात् ज्ञानात्पूर्वमपि सदेवेति न ज्ञानसाध्यमिति तस्मादविद्यानिवृत्त्यतिरिक्तो ज्ञा
नसाध्यो वैशेषिकाद्यभिमतो दुःखप्रागभावासहवृत्तिदुःखध्वंसरूपो मोक्षोभिव्यक्त इति चेत्

न दुःखं मे मा भूदिति दुःखप्रागभावस्यैव कामनाविषयत्वप्रतीतेः अकामनाविषयदुःख
ध्वंसो हेतोरेन ज्ञानाद्यभिध्वंसनुपपत्तेः उत्पन्नदुःखस्य स्वविषयकज्ञाननाश्यत्वेन तन्नाशार्थं
ज्ञानान्तरानपेक्षणाच्च ननु दुःखध्वंसमात्रस्याकाम्यत्वेन ज्ञानासाध्यत्वेपि दुःखप्रागभावासह
वृत्तिदुःखध्वंसस्य काम्यत्वं ज्ञानसाध्यत्वं चास्त्विति चेत् मैवं किं ज्ञानस्य विशिष्टदुःखध्वंस
हेतुत्वं विशेष्यदुःखध्वंसहेतुत्वेन उत विशेषणीभूतदुःखप्रागभावासहवृत्तित्वांशजन
कत्वेन उभयजनकत्वेन वेति नाद्यः दुःखस्य स्वज्ञाननाश्यत्वेन तदर्थं ज्ञानानपेक्षणा
दित्युक्तं न द्वितीयः दुःखसमानाधिकरणसकलदुःखप्रागभावनाशं विना दुःखध्वंसस्य दुःखप्रा
गभावासहवृत्तित्वानुपपत्तेः भवतु तर्हि सकलदुःखप्रागभावनिवृत्तिरेव ज्ञानसाध्येति चेत्
न प्रागभावस्य प्रतियोग्युत्पत्तिं विना नाशायोगादित्युक्तत्वात् न च सकलदुःखोत्पत्तिरेव ज्ञानसाध्ये
ति वक्तुं युक्तं तत्वज्ञानस्य ज्ञानत्वेन रूपेणाविद्यानिवृत्त्यतिरिक्तकार्यान्तराभावात् हिरण्यग
र्भादीनां तत्सुखं परित्यज्य दुःखोत्पत्त्यर्थं चेतनप्रवृत्त्यसंभवाच्च दुःखप्रागभावानामनंतत्वे
तन्नाशस्याप्येकस्य संपादयितुमशक्यत्वात् अपरं तदेव भवतिविशेषः हि दुःखप्रागभावस्य पुरुषप्रयत्नसंबद्धो

१० विद्यासशेषा निवर्त्तते निःशेषा वा न तावदाद्यः तत्र शेषो नाम तत्कार्यं तदंशो वा नाद्यः १०

यास साध्यज्ञानवैयर्थ्यप्रसंगश्चेति तस्मादेशोपि कादिमतं ज्ञानवैयर्थ्यापत्तेर्नादरणीयमिति
परिहरणीयस्तर्हि प्रात्मविरूपाविद्यानिवृत्तिलक्षणमोक्षे ज्ञानसाध्यत्वानुपपत्तिरूपो दोषः ५२
परिह्रियते अस्तु वाविद्यानिवृत्तिरूपात्मनः प्रहसंगभूतं ज्ञानसाध्यत्वं तथाहि यस्मिन्नवि
द्यमाने यस्य प्रागभावोऽनुवर्त्तते यस्मिंश्च सत्यनुवर्त्तते तेन तत्साध्यमित्युच्यते तथा चासति
ज्ञाने अविद्यानिवृत्तिप्रागभावो अविद्यारूपोऽनुवर्त्तते सति च ज्ञानेनानुवर्त्तत इति कथमवि
द्यानिवृत्ते [illegible] र्ज्ञानसाध्यत्वं न स्यात् नन्वेवमपि प्रह
त्तिसाध्यज्ञानस्य स्वतंत्रपक्षणमिति चेत् उच्यते ज्ञानात् सर्वमात्मरूपाविद्यानिवृत्तिर्वि
द्यमानापि स्वप्रतियोगिसहिता भवति ज्ञानोत्तरकालं तु निवृत्तिमात्रं तथा तस्या अवस्थान १२०
मित्यस्त्येव ज्ञानानुकूलत्वमिति यद्वाहस्य सर्वमात्मैवाभूत् [illegible] चोपरमः श्रीवद् इत्यादिश्रुतिसिद्धम्
विद्यानिवृत्तिरूपत्वमात्मनो निवारयितुं न शक्यत इत्यलं ननु ज्ञानात् निवर्त्तमानो [illegible] उ
पादाननिवृत्तावुपादेयानिवृत्त्ययोगात् न द्वितीयः अज्ञानस्यांशाभावात् भावे वा तस्या
ना२ प्यज्ञानत्वेन ज्ञाननिवर्त्यत्वस्य भावात् न च प्रतिबंधकादज्ञानांशानिवृत्तिरिति वाच्यं ज्ञाने नाज्ञा ५२
ननिवृत्तौ प्रतिबंधानिरूपणात् अज्ञानकार्ययोः प्रतिबंधकत्वे अज्ञानस्य कदापि

धा धा२

८ व्यवहारेण निरवयवत्वमयुक्तं दोषराहित्यस्याविद्याया निश्चितत्वात् वस्तुतस्तु ८
व४

निवृत्तिर्न स्यात् अतएवात्मनोपि न प्रतिबंधकत्वं नापि निःशेषा सा निवर्त्तते तथा सति सद्यः
शरीरपातप्रसक्तौ जीवन्मुक्तिशास्त्रवैयर्थ्यप्रसंगादिति चेत् उच्यते प्रारब्धकर्मोपादानी
भूताविद्यांशस्यावस्तत्वान्निवृत्तौ बाधकाभावात् न च ज्ञानस्याज्ञाननिवर्त्तकत्वे प्रति
बंधकासंभवात् बाधकमिति वाच्यं तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये तथा
सत्त्वशुद्ध्यर्थं [illegible] इत्यादिश्रुतेः वसिष्ठप्रमुखादीनां जीवन्मुक्तश्रवणा
न्याय६ त् [illegible] जीवन्मुक्तिप्रतिपादकन्यायस्य च बलात् प्रारब्धकर्मणस्तस्योपादानीभूता
ज्ञानांशनाशप्रतिबंधकत्वकल्पनात् न च ज्ञाने अंशाभावः न निरवयवत्वं नो सावयवत्वं तस्य
ज्ञानविषयकत्वं तत्त्वज्ञाने नाविद्यायाः आवरणशक्तिविनाशेपि जीवन्मुक्तिशास्त्रस्य
चानुपपत्त्या विक्षेपशक्तिमदज्ञानं जीवन्मुक्तशरीरे परा शान्तिसत्त्वे वेति नानुपपत्तिः
न चैवं अविद्यांशस्य विक्षेपशक्तिमदविद्यायाश्च नाशकाभावाद् देहकैवल्यानुपप
त्तिरिति वाच्यं प्रारब्धकर्मणस्तत्त्वज्ञानकार्यप्रतिबंधकस्य प्रारब्धकर्मभोगेन भोगाभा
वे सति पूर्वोत्पन्नतत्त्वज्ञानान्मानसंस्कारतोज्ञानांतरोदयाद्वा तन्नाशोपपत्तेः सनव
र्द न चेदं विरुद्धमुच्यते यद्वा कस्य जन्म साक्षात्कारे विषयो [illegible] ति यतो वा वा निव

प्य

अथेदं१ तेनेः प्रमाणे मनसा सहितेनिन्द्रियेणात्मनः परिणामरूपसाक्षात्कारविषयत्वप्रतिषेधादिति चे
१३२ त् न मनसैवानुद्रष्टव्यमिति निष्कृत्यविशुद्धमनोगम्यत्वप्रतिपादनात् कस्तर्हि श्रुत्योर्विरोधपरि
हारोपायः श्रृणु मनोविषयत्वनिषेधस्य फलव्याप्यत्वाभावप्रतिपादनपरत्वं अपरस्य च वृत्तिव्या
प्यत्वप्रतिपादनपरत्वं चेति किं तत्फलव्याप्यत्वमिति चेत् उच्यते इंद्रियजन्यवृत्त्यभिव्यक्तचैतन्य
विषयत्वमित्याहुः न चात्मनः फलविषयत्वाभावे कथं व्यवहारविषयत्वमिति चेत् न धर्माधर्मा
दौ परवर्तीयवत्पराद्यैव फलव्याप्यत्वाभावे पि व्यवहारस्य दृष्टत्वात् न च तत्र फलव्याप्यत्वाभावे पि
चैतन्यसंबंधोस्त्येव धर्माधर्माद्याकारवृत्त्यवच्छिन्नं तच्चैतन्यस्यैव स्वरूपतो धर्माद्यधिष्ठानचैत
न्यात्मिकस्य धर्मादिसंबंधित्वात् तथा च चैतन्यसंबंधित्वेन व्यवहारो नान्यथेति कथं चैतन्याvi
षयआत्मनि व्यवहार इति वाच्यं व्यवहारसामान्यस्य ज्ञानमात्रहेतुकत्वात् ज्ञानं च स्वरूपचैतन्य
चि५ मपीति नात्मव्यवहारे किंचिद्बाधकं न चैवं स्वरूपस्यैव नित्यमात्रात् सर्वव्यवहारप्रसंग इति वाच्यं १३२
अनात्मव्यवहारे व्यवहर्तव्यविषयकचैतन्यस्यापि हेतुत्वात् न च तथाप्यात्मव्यवहारमात्रे व्यवहर्त
व्यविषयकचैतन्यस्य हेतुत्वमिति वाच्यं आहिलनीयविद्रूपस्यात्मनस्तथाविधविषयत्वाभावेन व्यवहारे
अनात्मविशेषणस्याव्यापकत्वात् आत्मनः स्वयंप्रकाशत्वात् स्वव्यवहारे स्वविषयकप्रकाशांतरान ५३
पेक्षणात् इत्येवं तदर्पणेऽस्यायुक्तत्वात् स्वप्रकाशत्वं च इंद्रियजन्यवृत्त्यनभिव्यक्तचैतन्याविषयत्वे सति

व्यक्त

१ अत्र ज्योतिःशब्दस्य प्रकाशशब्दापरपर्यायस्याविद्यानिवर्तकानुकूलस्वरूपचैतन्यमात्रपरत्वात् ज्योतिः१

अपरोक्षव्यवहारयोग्यत्वं परोक्षो धर्मादिर्भवति व्याप्तिवारणाय अपरोक्षव्यवहारयोग्यत्वमिति पदं
योग्यत्वपदस्थानेविषयत्वपदत्ताने अंतःकरणतद्धर्मसुखादौ भवति व्याप्तिः स्यात् तेषामपरोक्षव्य ष्यप२
वहारविषयत्वात् तद्वारणाय योग्यत्वमिति पदं न च हि अपरोक्षव्यवहारयोग्यधीसुखादौ चैतन्या
परोक्षव्यवहारोपपत्तेः अध्यक्षयोग्यतेति न वक्तव्यमिति चेदाहुः यत्र हि यो धर्मः स एव न तिष्ठति कि
त्र५ रणांतराच्च पश्चाद्भवति तत्रैवोपपद्यते तर्कः अस्ते न हि सुखादौ सत्यपरोक्षव्यवहारस्तत्र पश्चात्
भवति सुखादेरज्ञायमानकालाभावात् व्याप्तौ भवति व्याप्तिवारणाय इंद्रियजन्येत्यादि विशेषणं
अत इंद्रियजन्यपदं स्वरूपकथनपरं अन्योन्यतु चैतन्याविषयत्वमेव स्वप्रकाशत्वं आत्मा तिमि
कस्य सर्वस्य चैतन्यविषयत्वादित्याहुः आत्मनः स्वप्रकाशत्वे किं मानमिति चेत् उच्यते अ
त्रायं पुरुषः स्वयं ज्योतिः हृद्यंतर्ज्योतिः पुरुष इत्यादिश्रुतिः [illegible] कर्तृत्वं ज्योतिः र्द५
शब्दार्थ इति चेत् न ज्योतिर्बोधज्ञानस्योक्तविधया निःसहेन कर्त्रनपेक्षणात् ज्योतिः कर्तृरितिक
र्यकल्पने गौरवाच्च आत्मा स्वप्रकाशः परार्थत्वात् इत्यादिरनुमानस्य स्वप्रकाशत्वप्रति
पादिकया निरवकाशया श्रुत्या बाधितत्वाच्च निर्धर्मके आत्मनि हेतोरसिद्धेश्च किंच उक्तमेव ते
बन्निस्वज्ञानरूप आत्मा स च प्रकाशमानो [illegible] प्रकाशयतीति तस्य [illegible]

एवा

अज्ञाने व्यवहारादर्शनात् ज्ञानस्याज्ञानस्य मत्त्वेन द्विषयकसंशयादिरपि स्यात् ५

ज्ञानांतरेण वक्तव्यः नहि निरपि अप्रकाशमानं नार्थं प्रकाशयतीति तस्यापि प्रकाशांतरमेषि
तव्यमित्यनवस्था स्यादिति ज्ञानरूप आत्मा स्वप्रकाश एव ननु कोयं निर्बंधः प्रकाशमा
नमेव ज्ञानमर्थं प्रकाशयेदिति चक्षुरादिवदप्रकाशमानमेव किं न प्रकाशयेदिति चेत् नमेव क्त्वां
तमनुजानाति सर्वमिति श्रुतिविरोधात् किंच ज्ञानस्यावश्यं स्वस्माद्भिन्नेऽप्रकाशो वक्तव्यः अन्यथा
अव्यवहितक्षणे ज्ञानामीति ज्ञानव्यवहारो न स्यात् किंच इदं ज्ञानं दूरविषयकं न वा इति ज्ञाने दूरवि
षयत्वसंशयदर्शनात् दूरविषयकं न भवतीति विपरीतनिश्चयदर्शनात् च दूरत्वनिश्चयो न जा
यते इति तावत् प्रतिपत्तव्यम् तथा च यः संशयव्यतिरेकनिश्चयोऽयं प्रतिबंधको तन्निश्चयस्तदभाव इति
व्याप्त्या ज्ञाने दूरविषयकत्वनिश्चयदशायामेव पुरोवर्तिनि दूरत्वनिश्चयो वक्तव्यः स च ज्ञाने दू
रविषयकत्वनिश्चयो ज्ञाननिश्चयं विना न भवतीत्यागतमेव ज्ञानं प्रकाशमानमेवार्थं प्रकाश १२२
यतीति न च ज्ञाने दूरविषयकत्वसंशयः विपरीतनिश्चयो वा न भवत्येव ज्ञानस्य धर्मि
णः सविषयस्यैव ग्रहणनियमादिति वाच्यं चेष्टाविशेषानुमितस्य परनिष्ठज्ञानस्य विषय
विशेषग्रहणं विनापि ग्रहणात् स्वनिष्ठवर्तमानकालीनज्ञानस्यार्थस्वज्ञानिश्चायकस्यापि ५५
वेधज्ञानवादिमते विषयविशेषविशिष्टस्य ग्रहनियमायोगात् नहि ग्राह्यस्यार्थस्य ज्ञा

वद्विशेषणविशिष्टस्य ग्रहणनियमे प्रमाणमस्ति नहि चक्षुषा गृह्यमाणे दूरः परिमा
णादिया वद्धर्मविशिष्ट एव गृह्यते येन सविषयकमेव ज्ञानं गृह्यत इति वचनं सुभाषितस्या
स्म त् प्रपंचस्याध्यस्ततया चैतन्यविवर्तत्वात् सदा चैतन्यसंबंधेपि अभासमानत्वात् प्रकाशमा
नमेव चैतन्यमर्थप्रकाशकं अपि त्वप्रतिबद्धप्रकाशं चैतन्यं नार्थप्रकाशकं इत्यावरणमभ्यु
पगंतव्यं स च चैतन्यप्रकाशो ज्ञानांतरेण न संभवतीति ज्ञानं स्वप्रकाशमेव किंच आत्म
व्यवहारः व्यवह्रियमाणप्रकाशजन्यः व्यवहारत्वात् संप्रतिपन्नवदित्यनुमानादात्मप्रकाश
सिद्धौ अद्वितीयस्यात्मव्यतिरिक्तप्रकाशानिरूपणात् आत्मैव स्वस्य प्रकाशः किंच अस्ति भाव
भाति जानामि आत्माश्रयकज्ञानव्यवहारः सर्वविशिष्टव्यवहारो विशेषणज्ञानसाध्यः त १०६
द्विशेषणीभूतस्थायमात्मा केन भासते इति विवेक्तव्यं तत्र प्राभाकरा वदंति आत्मा
विषयज्ञानाश्रयतया भासते इति नैयायिकास्तु स्वसमवेतमनःसंयोगजन्यस्वविष
यकज्ञानेनेति तत्र प्राभाकरमतमयुक्तं ज्ञानातिरिक्तस्य ज्ञानविषयत्वनियमात्
ज्ञानज्ञानाश्रयातिरिक्तस्य ज्ञानविषयत्वनियमकल्पने गौरवात् सुषुप्तिप्रलयादौ वि
षयज्ञानं विनाप्यात्मभानाच्च ज्ञानविषयत्वेन ज्ञाने च नैयायिकपक्षो दृढविशेषः सोपि

अद्वै. सि. पक्षेऽनुपपन्नं भवति कर्तृकर्मविरोधात् आत्मनो ज्ञानविषयत्वे अनात्मत्वापत्तेश्च असं
१२३ गे आत्मनि ज्ञानजनकमनःसंयोगासंभवात् ज्ञानात्मनोः संबंधानिरूपणाच्च तस्मा
त्प्रकारान्तरेण ज्ञानासंभवात् आत्मा स्वप्रकाश एव अनुमानं च आत्मा स्वप्रकाशः
संवित्कर्मतानंतरेण परोक्षत्वात् प्रभाकरमते संविद्वत् नैयायिकमते व्यतिरेके घ
टादिवत् न चाभाकरमते अप्रयोजकत्वं नैयायिकमते हेत्वसिद्धिरिति वाच्यं मत
द्वयस्यापि निरस्तत्वात् तार्किकमते आत्मनो ज्ञानविषयत्वेकर्तृकर्मविरोधात् गुरुम
ते स्वप्रकाशत्वे प्रयोजकगौरवापत्तेरिति चेन्न व्यभिचारवारणाय संवित्कर्मतानं
तरेणेति विशेषणं संवित्कर्मतारहितत्वादिस्तु केवलधर्मोऽपरोक्षे व्यभिचारः स्यात् संवि
त्कर्मत्वं नाम विषयतया संविज्जनकत्वं तच्च परोक्षेण संभवति परोक्षपदार्थस्य ज्ञा १२३
ने प्रति विषयत्वेनापि जनकत्वाभावात् न तु वृत्तिसकर्मत्वासंभवात् अतीतानागत ग
व्यवहारविषयज्ञानस्य परोक्षरूपस्य अर्थं विनापि जायमानत्वात् अत उक्तं अ
परोक्षत्वादिनियतापि च संवित्निमित्ते सुखादौ व्यभिचारो भवति सुखादेरपि साक्षिसं ५५

विद्याविदजनकत्वेनोक्तरूपसंवित्कर्मतानधिकरणत्वात् अपरोक्षत्वाच्च तथापि परमते
नैवेदमनुमानमिति सद्दोषः निरूपिता विद्यानिवृत्तेः प्रयोजनमाह निःशेषभेदेति भि
घ्नत इति मुमुक्षोर्विधीयमानः प्रपंचो भेदस्तद्धार्थः ~~निवृत्ते प्रयोजनमाह निःशेषभेदे~~
~~ति भिघ्नत इति मुमुक्षोर्विधीयमानः प्रपंचो भेदस्तद्धार्थः~~ निवृत्ते स्व
स्य स्वरूपमित्यादिना संबंधः स्वस्वरूपमित्यनेनाति स्पष्टत्वं सूचितं ब्रह्मप्राप्तेर्दृष्टा
न्तमाह बिम्बमिति ब्रह्मसाक्षात्कारादविद्यानिवृत्तौ ब्रह्मभावनरूपब्रह्मप्राप्तेर्भवसहमं
तो२ जीवेऽपि न किंचित् कर्तव्यमवशिष्यत इत्याह नतमेति कृतं अविद्यानिवृत्तिः ब्रह्मभा
वरूपपरमपुरुषार्थरूपं कृत्यं कर्तव्यं येन स कृतकृत्यो जीवन्मुक्त इति यावत् ब्रह्मज्ञा
नं ब्रह्मभावनरूपब्रह्मप्राप्त्युपायत्वमपि स्मृतिरुदाहरति ब्रह्मवेद ब्रह्मैव भवतीत्यादिना ज्ञानस्य मोक्ष
हेतुत्वे पुनः श्रुतिस्मृती उदाहरति तमेवमित्यादिना इत्यादौ साधनत्वात् ब्रह्मज्ञानेन मुक्तिरिति चं४
इत्यादिवाक्यमित्यादः उक्तमोक्षसाधनीभूतब्रह्मज्ञानसाधनस्य श्रोतव्यं दर्शयन् तस्मा
साधारणं साधनमाह यत इति विशेषोपायनत्रयस्य त्रिविधपरिच्छेदशून्यस्याद्वि
सूक्ष्मचिद्घनकार्यरहितं तत्स्वरूपं ध्येतत्त्वाय ते मुमुक्षुभिर्गीतं स्वस्वरूपं गुरोरीश्व
ब्रह्मप्राप्तौ श्रुतिमुदाहरति तथा चेति ब्रह्मज्ञानात् स्वस्वरूपमेव

भ

अद्वैत·टी रस्य संश्रयात्संभवातः सिद्धो दपरोक्षीभूतो भवेत् गुरुरेवेश्वर इति भावार्थः तदुक्तार्थमाह य
१२४ त इति ब्रह्मणि अभिधाद्वितीयं वच सो निवृत्तिः मनोपि त्वभिव्यक्ते तस्माद्विषय
संबंधनसो निवृत्तिः अद्वैतानुसंधानाख्यप्रकरणप्रसक्तो ऽमितिमिन्नं संस्थयं श्राइ एवमितिने दधि
याम्बरादहजीवैः कर्तृत्वादिधर्मा इति या भेदधीः इत्यपदार्थेषु पारमार्थिके
नानात्वबुद्धिर्वा तया भेदद्रष्टा तेन निर्विकल्प हृदयं मनीयस्तत्संसा दुःखं ५
सा राद्दिरक्तमित्यर्थः एतच्च साधनचतुष्टयस्योपलक्षणं ब्रह्मात्मानं ब्रह्मणि प्रत्यग
भिन्नं अद्वितीयेन नीयस्य तं तरति शोकमात्मवित् ब्रह्मवेद ब्रह्मैव भवतीत्यादिश्रु
तितो मोक्षहेतुसाधनत्वं ब्रह्मज्ञानस्यैव श्रीमत्सुंदरोबरामचंद्र पंडितेभ १२४
नामानमितियावत् तं प्रतिउद्दिश्य नत्वा नमया एवमुक्तरीत्या अज्ञानि
ब्रह्मनिरूपितमिति संबंधः अन्यानप्यधिकारिणः प्रत्यस्य ग्रंथस्योपकार स्य ३
कत्वमाह संतइत्यादि तासंतो विवेकादिमंतः सम्यक् जिज्ञासु गुरुशुश्रूषादियुक्ताः
त्वाइदमाख्यं एतत्प्रकरणार्थं शोधयन्तु कुर्वंतु इत्यर्थः अपिवास्य विद्यावि ५ ६

लो तु

अद्वैत·टी शुध्यर्थं संतः प्रार्थयते संतइति कुतर्कपंकमग्नां यो ब्रह्मविद्यांकुशामिमां गामुद्धारत
१२५ सत्पंकेरुहमदभ्रजे ७ श्रीराघवरामकृतिनो विदुषा बलेन स्वात्मावबोधपरिशुद्धिमभीप्सता
मे कृत्यं सदापरिहितं निरते विशोध्य काचापि कोचनयुजा समुपैति शोभा ८ गुरूणां चरणांभो
जस्मरणान्निर्मितामया श्रुत्युक्ता सुखदाभूयादनुसंधानवर्द्धिनी इति श्रीमज्जगन्नाथा
नंदमुनिविरचिताद्वैतानुसंधानटीका समाप्ता ।श्रीशिवार्पिताच
शके १७ श्रीराक्षसाब्दीयश्रावणे लिखापितं जडियोपाभिधेयेन घनश्यामेन गुर्जरविप्रेण·